शिरोमणिटीकाया भवनन्दीटीका

१५१० प. ६८

संगत्यनुमितिटिप्पणं

न्याय

संगत्यनुमितिटिप्पणं

१९६०

१ श्रीगणाधिपतये नमः ॥ श्रीगोविंदेति ॥ अत्र पद्ये भोजेस्तत्रपरिणामः नवचंद्रेलत्ररूपकं तमःसंघेसत्रातिशयोक्तिः
दुरवगाहशास्त्रार्थसंघातसांधतमसत्वेन रूपणात् । पूर्वोक्तविप्रियमाणावाक्यार्थपर्यालोचयावाक्यांतरप्रतिपादन
रूपस्यात्मनस्यसंचारत्वेन रूपणाच्च तेषां च त्रयाणां समप्राधान्येन गोविंदविषयकरतिभावांगत्वेनालंकारसंसृष्टि
र्बोध्या ॥ निगूढमिति । मतिदीधितेः सर्वतः प्रसृतमैश्वविमानविचित्रकिरणेषु सूक्ष्माभूरेणुच्छायादिवत्स्फुटमप्रतीयमान
तया निगूढं सिद्धांतरहस्यार्थजातं यथोरक्षणाकौशलशिक्षयापरोप्राप्यते तया [illegible] स्फुटार्थकविवरणविशेषेणमयाता
दृशार्थजातं प्रकाश्यतइत्यर्थः । एतेन दीधितेर्निगूढमित्यापादतो विरोधः परिहृतं भवति स्वग्रंथस्याधारणाप्रयोजनं च द तो
र्शितं भवतीति बोध्यं । श्रीमद्यतीति । अत्र श्रीमितिविशेष्यं परमात्मनइति विशेषणं । ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिवि ग म॰
ध स्मृतः । समस्तश्रुतिस्तोमानां शब्दारणाद्गगणात्स्मोमिति पदमित्यादिवचनजातैः ॐ कारस्येश्वरात्म्येतु पर्यवस्तुनि रूढत्वात्परमात्म
पदस्ययोगिकत्वात्तयोगिकरूढयोश्चरूढस्येव विशेष्यत्वात् नच परमात्मादिपदाच्चतुर्थ्यनुपपत्तिः नमःपदार्थस्यतेनसहा १

नन्वयादितिवाच्यं विशेषणाविभक्तिविधयैव तत्र चतुर्थ्यापपत्तेः ॐमितिपदेन मः पदप्रयुक्तचतुर्थ्यां ह्योपेपि शोभनेत्व
विहरतीत्यादाविव विशेषणाविभक्तेः प्रवृत्तविधानादिति केचित्व्याचक्षते। तदसम्यक् माणाख्या हृपरमात्मपदस्येव वि
शेष्यत्वमंगीकृत्य समाचष्टे। परमात्मन इति। अत्र परमात्मपदस्य म[illegible]वति रूढिरेव परं तु योगसहितास्या। उत मंप्रकृष्टत्व
न्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर इत्यादेः परमात्मा सदाशिव इत्यादेश्च रूढिर्यात्र हकस्येव
रूढं तरप्रमाणस्य सत्तास्तं तु योगसहितास्या। न च तावतैव विशेष्यत्वविरोधः। ॐकारस्यापि समस्तव्यस्तत्वाभिप्रायादिञ्चका
णाद्यैर्वेदैर्हि त्रिभिरुपितत्रीन् विश्वरादृन् समस्तं व्यस्ततां शाराणादगणं सोमिति पदमित्यभिप्रत्य वाक्यपर्यालोचनया योगरू
ढेरेव लाभात् एवं च द्वयोरपि पद [redacted] दयोः योगरूढत्वाविशेषेपि परमार्थपदयोगार्थस्य तत्र हि स्थितिप्रत्यकर्तृत्वा
देः ॐकारयोगार्थत्वं ज्ञायमेदनिर्वाह्यतया ॐकारस्य परमात्मपदप्रतिपाद्यार्थनिर्वाहकोक्ताभेदप्रतिपादकत्वेन विशेष
णत्वमेवाकामादायातितं ननु कथमपि विशेष्यत्वमिति रूढापि संधिः न च सर्वोत्कृष्टात्मनेति। योगमात्रप्रदर्शनविरोधः तस्य

सर्वोत्कृष्टात्मने ईश्वरायेति रुद्रार्थो नमोऽवपरत्वात् नित्यज्ञानादिमत्त्वरूपईश्वरत्वस्यैव परमात्मपदे रुद्रार्थावच्छेदकत्वात् उ
२ त्कर्षश्चेति योगार्थघटकः परमपदप्रतिपाद्योत्कर्षश्चेत्यर्थः स्वहृदि स्थित इति अत्र स्वस्यादित्रितयकर्तृत्वं ब्रह्मादिशरीरत्रया
2 वच्छिन्नस्यानवच्छिन्नस्यैव वा। न त्वेकैकशरीरमात्रावच्छिन्नस्येत्येतद्विशेषणबलादेव ब्रह्माद्यतिरिक्तत्वयैवलक्षणो रुद्रार्थ
स्यावर्जितात्मानिरिति तदकथनं उभयपद्याविब्रह्माद्यभेदं विना उक्तविशेषणानिर्वाहात् तन्निर्वाहाय ब्रह्माद्यभेदप्रतिपाद
नमित्याह एकरूपस्येति। अनवच्छिन्नस्येत्यर्थः विचित्रेति। विश्वे इत्यर्थः ब्रह्मविष्ण्विति। ब्रह्मरुद्रात्मकायेत्यर्थः कथं ब्रह्मादित्वा
भेदस्य तत्राह ॐकाराय रकैरिति। ॐकारीयष्टावयवशक्तिलभ्यैर्ब्रह्मादिभिः परमात्मपदार्थस्याभेदान्वयबोधसंभवादिति भा
वः अत्र ॐकाररुद्रार्थस्य यो वेदादौ स्वरप्रोक्तो वेदान्ते च प्रतिष्ठितः तस्य प्रकृतिलीनस्य यः परः स महेश्वरः। ॐ तत्सदिति नि
र्देशो ब्रह्मणस्त्रिविधस्मृत इत्यादिवाक्यप्रतिपन्नस्य महेश्वरस्यादेरपि परमात्मपदार्थेऽन्वयो द्रष्टव्यः। रूपातीतमपीति। नित्यज्ञा ए म०
दिमत्त्वस्यादिकर्तृत्ववत्त्वं तमंगुरुपरत्वस्य परमात्मैकदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इत्यादि। अस्यांतर २

प्रतिपन्ने ईश्वरासाधारणं रूपं दर्शयतीत्यर्थः उक्तवाक्यपर्यालोचनया भूतपदस्य प्राणिपरत्वं विशिष्येत्यस्य चांतर्यामि
त्वेन स्वस्वकार्ये नियोक्तृतापरत्वं चाश्रयणीयमित्याह सर्वप्राणिन इति। एतद्व्याख्यायां विपूर्वकस्तभ्नातेः। भूत रूढस्यांत
र्यामित्वयानियोक्तृतायां प्रयोगो न स्यात् इति क इति व्याख्यांतरं दर्शयति। विष्टंभ इति धारणात्मके इति विष्टभ्याहमिदं कृत्स्न
मेकांशेन स्थितो जगदित्यादौ तादृशसंयोगविशेषस्यैव विपूर्वकस्तभ्नात्यर्थत्वादित्यर्थः अत एवेति धृतिकर्मानुरोधेन भू
तपदस्य स्वर्वृत्तिपरत्वादेवेत्यर्थः। विश्वव्यापीति विश्वव्यापिपदे विश्वशब्दोपादानं भूतपचनस्याचार्यैरभिधानात् तन्न्यायेन व्रक्त
तेपि धारणकर्मत्वान्वयानुरोधेन भूतपदस्य मूर्तपरत्वमित्यर्थः प्रयत्नवदीश्वरेति तृणादिपदेन वाय्वादिसंयोगस्यैव गु
रुत्व ब्रह्मांडादिपतनेपि प्रतिबंधकसंयोगविशेषस्यावश्यकतया प्रयत्नवदीश्वरसंयोगस्यैव तथात्वं पर्यवस्यतीति प्रमाणांत
रस्य ध्रीचीनतायुक्तत्वं संपादितेति न तदर्थे नास्यासंलेशोपीत्याशयः अत एवेति विष्टंभस्य धारणात्मकस्य विवक्षणादेवे
त्यर्थः। द्यावापृथिवी इति एतस्य वाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इति छांदोग्यश्रुतिसंवादो युक्तत्वाख्या

२ नेभवतीतिविशिष्टंभयदस्यधारत्वापरत्वमेवोचितमित्याशयः यत्तुतद्विशेषयःपतनाभावः तत्प्रयोजकसंयोगत्वमेवतद्धा
रकत्वंनतुतद्विशिष्टपस्यतनंतदभावप्रयोजकेत्यादिरूपंतथासतिअनुत्पन्नपतनएववृक्षाग्रफलेवृक्षादेर्धारकत्वानुपपत्तेः
3 एवंचवाय्वादेःपतनाप्रसिद्धावपितद्धारकत्वमीश्वरस्योपपद्यते।अन्यथाभूतपरस्यमूर्तपरत्वेपिउक्तरीत्यापरमात्म
नोवायुविष्टंभकत्वासंभवेस्वेपदासंगतितावस्थात।एवंचाकाशादोपतनाप्रसिद्धावपितद्विष्टंभकत्वस्यपरमात्मन्यु
पपत्तेःभूतपदस्यमूर्तपरत्वमनर्थकमेवेतितद्बालप्रलापमात्रं उक्तदिशाआकाशादिनिष्ठेयःपतनाभावःसंयोगेतत्प्रयो
जनकत्वरूपपतनप्रतिबंधकत्वस्यसमर्थनेपितादृशसंयोगस्यपरमात्मनिदुर्घटत्वाद्विभुद्वयसंयोगाभावात्।एवंस्थितेआ
काशस्येश्वरातिरेकार्थवत्त्वेतस्यावतभूतनिष्ठपतनाभावप्रयोजकत्वयावद्भूतसमवेतसंयोगवत्वरूपंयावद्भूतवि
ष्टंभकत्वंपरमात्मन्यक्षतमेवेतिपक्षेनविरुद्धसमर्थ्येते।तदपिनसंभवतीत्याहापरत्वाकाशमितिमतानुसारेणेति।पदार्थ रा॰म॰
खंडनोक्तस्वमतानुसारेणेत्यर्थः ईश्वरस्यैवेतिआकाशात्मकातिरिक्तभूतभावेपीश्वरस्यैवतादृशभूततयाईश्वरात्मक २

भूतएवस्वप्रतियोगिसंयोगाभावेनयावद्भूतविष्टंभकत्वस्येश्वरेदुर्घटत्वात्नचयावद्भूतवृत्तिसंयोगवत्त्वमेवतथेतिप्रागु
क्तंयुक्तं।स्वविष्टंभेस्पर्शयोगेणाप्रतियोगित्वस्येवद्वितीयार्थत्वात्तथैवसर्वान्ब्राह्मणान्भोजयतीत्यादौस्वभिन्नयावद्ब्राह्मणा
नामेवभोजनकर्मत्वप्रतीतेस्सर्वभूतानिविष्टंभ्येत्यादौस्वभिन्नसर्वभूतविष्टंभकत्वस्यैवपरमात्मनिउत्सर्गतःप्रतीतेःभूतप
दस्यमूर्तपरत्ववत्त्वातीवादर्शनंचमितितुवयं।अखंडानंदबोधायेत्यत्रअखंडानंदस्यनित्यसुखस्यबोधायस्मादितिसुसत्या
नित्यसुखाभिव्यक्तिर्मुक्तिरितिभट्टमतिरीत्यामोक्षजनकत्वंतस्यदेनप्रतिपाद्यतइतिकेचिद्व्याचक्षतेमतंपरमात्मनिनित्यसुख
सत्वेप्रमाणाप्रदर्शनमुखेनजीवस्यनित्यसुखसत्वेप्रमाणाभावप्रदर्शनेननिराकुर्वन्नमुंजिनसिद्धतयाईश्वरेनित्यसुखसत्त्व
मताभ्युपेत्यैवतस्यदव्याचष्टेअखंडेतिस्यापीतिभट्टमतवदेवएतन्मतेपिप्रमाणाभावमाशंक्याहनित्यसंवित्तानमितिब्रह्म
स्वरूपेतिनमस्कृतिरूपेस्यार्थः।आनंदविशिष्टस्येति।अत्रानंदशब्दस्यअजहल्लिंगतयानपुंसकलिंगतामसत्यपियाचित्स
येनैववाच्येतिविशिष्टप्रतिपादनेसिद्धेनागृहीतविशेषणान्यायेनविशेषणतास्यानंदस्यनित्यत्वंउक्तम्स्येवासिद्धमिति

४ भावः ननु सुखस्य नित्यत्वे सुखत्वस्य पुण्यजन्यतावच्छेदकानुपपत्तिरत आह तथा चेति आनंदपदस्य सामानाधिकरण्यका
लिकोभयसंबंधेन दुःखवद्भिन्नदुःखाभावे औपचारिकत्वे न विशिष्टनित्यत्वाप्रतिपादनेपि न तादृशश्रुतिबलात् परमात्मनि
५ नित्यसुखसिद्धिरतः तन्मतं परिष्कृत्य सिद्धांतरीत्यैव व्याख्यातमाह अखंड इति दुःखासंभिन्न इति सामानाधिकरण्यकालिको
भयसंबंधेन दुःखवदन्य इत्यर्थः आनंदः दुःखाभावः एवंभूत इति मोक्षजनक इति परमार्थः पक्षे इति यद्विषयकोबोधो मो
क्षजनक इति विग्रहार्थो पवर्गानवलेन मोक्षजनकज्ञानविषयायेति समासार्थ इति भावः ननु भगवतो लोकाधारकत्वं क
स्मै इति स्वगतफलायैव न तु लोकार्थं आत्मनस्तु कामाय सर्वं प्रियो भवतीति श्रुतेरत आह तथा च लोकाधारकत्वादिकं नोत्कर्षरू
पमित्येतच्छंकापरिहाराय पूर्णायेति पदमवतारयति पूर्णायेति अप्रतिहतेच्छायेति प्रतिघातो विषयाप्रसिद्धजन्यदुःखवे
शिष्ट्यं तादृशाविशिष्टेच्छावद्भिन्नायेत्यर्थः स्वीयसुखेच्छावद्भिन्नायेति तु परमार्थः संगतिप्रदर्शने तिप्रत्ययोपजीवकत्वादिति राम०
। संगतिप्रदर्शनस्य अनुमानं निरूप्यत इति निरूपणप्रतिज्ञायाश्चेत्यर्थः प्रयोजनाभावेति प्रवृत्तिसामग्रीसंपादनं विरोध ४

सामग्रिविच्छेदो वा फलं नेह संभवतीत्यर्थः ननु उन्मत्तप्रलपितत्वादिशंकालक्षणविरोधसामग्रीविच्छेद एव फलं स्या
दत आह संगताभिधानस्यैवेति वस्तुतोऽपि तत्संगतं तदभिधानस्येत्यर्थः ननु संगतिज्ञानविशिष्टसंगताभिधानत्वेन ता
दृशशंकानिवर्तकत्वमिति भावः यद्यपि उन्मत्तप्रलपितत्वादिशंकानिरासे अन्वयव्यतिरेकाभ्यां संगतिज्ञानस्यैव शं
कानिरासप्रयोजकता तथा संगतिप्रदर्शनं नानार्थकं तथापि स्वयं संगतमात्राभिधानेऽपि श्रोतुस्तत्र मानान्तरेण संगतिज्ञानं भ
विष्यतीति। किं ग्रंथकृता तत्प्रदर्शनेनेत्याशयः संगतिप्रदर्शनस्येति। यद्यत्संगतं तत्तदेकवाक्यमिति नियमात् संगतिप्र
दर्शनं न एकवाक्यतानुमितिः यद्यदेकवाक्यं तत्तत्स्फलैकफलकमिति इत्येकवाक्यताप्रतिपत्त्यैकफलकत्वप्रतिपत्तिरिति
फलसाधनताज्ञानरूपप्रवृत्तिसामग्रिसंपादनमेव संगतिप्रदर्शनस्य प्रयोजनमिति पर्यवसितोऽर्थः इदं तु चिंत्यं उन्मत्त
प्रलपितत्वादिशंकानिरासवदेकवाक्यत्वाक्षिप्तत्वेऽपि स्वयं संगतमात्राभिधानेऽपि श्रोतुर्मानान्तरेण संगतिज्ञानादेव संभवा
त्तादर्थ्येनापि संगतिप्रदर्शनं निरर्थकमेवेति निरूपणाप्रतिज्ञाया इति उक्तः संदर्भस्य अनुमानीयलक्षणस्वरूपप्रामा

णपप्रतिपादनपरत्वबोधकस्य निरूप्यत इति शाब्दस्येत्यर्थः शिष्यावधानमिति अवधानं विषयांतरसंचारविच्छेदः तत्र
५ व्याप्तिविशिष्टे साध्युतरसंदर्भस्यानुमाननिरूपणत्वाग्रहे प्रसक्तनिरूपणोद्देशत्वग्रहात्कृतकरत्वेन इच्छाविच्छेदात् वि
5 षयांतरसंचारः प्रसज्जत एवेति तन्निवृत्त्यर्थं निरूपणप्रतिज्ञावश्यकेति फलितार्थः नन्वस्त्वेकवाक्यताप्रतिपत्तिः तं प्र
तिप्रदर्शनस्य फलं स्वेवतु प्रवृत्तेकि मर्थसाधारणानुपयोगं दर्शयति पत्त्रयोजनतावेमवगम्येति प्रयोजनवत्तामव
वगम्य पूर्वग्रंथे प्रवृत्ती पेक्षावंतः तेषामित्यर्थः तेनयततेः नैकवाक्यानिवेशलक्षणो विरोधः तथाचैकफलसाधनाने
कधर्मिस्थलीयप्रवृत्तौ पूर्वधर्मिप्रवृत्तसामग्र्याः एवउत्तरांशेऽपि प्रवृत्तावपि हेतुतयातदवद्धर्मिण एकवाक्यताग्रहमंतरे
णावावद्धर्म्येकफलसाधनत्वग्रहसंभवात् तावतामेकवाक्यताग्रहायसंगतिप्रदर्शनमावश्य[illegible]कमिति भावः ननु
प्रत्यक्षादिग्रंथानामेकवाक्यत्वं नवाक्यार्थैक्यं प्रतिप्रकरणं वाक्यार्थभेदात् नितरामेवपदार्थसंघरोक्तिकलशोसीत्यादि राम
वद्विरोधात्त्व अतोजयिमुनिसूत्रोपात्तमेकवाक्यत्वं विवक्षितमित्याह अत्रचेति अत्रचइत्येतेत्यादिप्रश्लिष्टपठितेपुपञ्जः सं ५

याजेषु मंत्रविभागस्य दुर्निरूपत्वात् किंमेको मंत्र इति मंत्रपरिमाणानिर्द्धारणाय यावदेकं वाक्यं तावदेको मंत्र इति एकवा
क्यत्वं एकमंत्रताप्रयोजकत्वेन निरूप्य एकवाक्यत्वमेव किमित्याकांक्षायां एकवाक्यतालक्षणं अर्थैकत्वादिति सूत्रेणाचा
र्यैर्जैमिनिभिर्दर्शितं। अर्थैकत्वादेकं वाक्यं विभागाचेत्साकांक्षं स्यादिति। विभागे साकांक्षत्वे सति एकार्थकपदसंघातत्वमेकवा
क्यत्वमिति यथा देवस्य त्वा हस्ताभ्यामग्ने जुष्टं निर्वपामीति। अत्र देवस्य त्वेत्यादिपदानां प्रतिस्वमर्थभेदेपि सवितृप्रसवावच्छि
ला न्नत्व अश्विबाहुकरणकं पूषहस्तककरणकत्वरूपविशेषणत्रयविशिष्टनिर्वापरूपतात्पर्यविषयार्थस्य एकत्वात् एकार्थत्वं
अन्यतरविशेषणानुपादाने किं तत्तृतीयं विशेषणं विभागे साकांक्षत्वाच्च तत्र स्यात वसदकदंवस्य एकवाक्यत्वादेकं तत्त्व
तत्र द्वयोर्देवयोर्व्यावृत्तिं क्रमेणादर्शयति अर्थैकत्वादित्येतावन्मात्र इति अनयोरिति अनयोर्मंत्रयोरित्यर्थः द्वयोर्मंत्रयोर्वि
भागत्वावच्छिन्नरूपएकार्यतात्पर्यकत्वात् एकवाक्यतापत्तिरित्यर्थः साकांक्षं चेदिति विभागे साकांक्षं चेदित्यर्थः उक्तमंत्रयोः
परस्पराभावे परस्परस्य आकांक्षानुत्थापकत्वान्न विभागे साकांक्षत्वमिति भावः विभागे साकांक्षत्वं निर्वक्ति विभागे इति वि

६ छियपाठ परस्य णाभावपुरस्कारेण पाठे परस्मणार्थान्वये इति तथा च स्वघटकान्यतमाभावप्रयुक्ततदर्थगोचराकांक्षोत्था
6 पकताकान्यतरैकपदसमूहत्वमिति निष्कर्षः तदिदं विभागे साकांक्षत्वं घटमानयेत्यादिवाक्यघटकयोः पदयोरुपपाद
यति यथा घटमानयेत्यत्रेति तथा च सूत्रे विभागे साकांक्षमित्यस्य विभागे साकांक्षस्वघटकपदमित्यर्थो विवक्षणीय इ
त्याशयः एवं च भागो वा मित्यादिमंत्रसमूहे स्वघटकांशयोः नोक्तविभागे साकांक्षत्वमिति तद्वारणाय नित्यादमगो वामिति
तावन्मात्रे चेति विभागे साकांक्षत्वमात्रे चेत्यर्थः सदनार्थक इति स्योनं ते सदनमिति सदनलिंगादिति भावः सादनार्थक
इति तस्मिन्सीदेति सदनाभ्यनुज्ञापनरूपसादनस्य विवक्षितत्वात् इत्यर्थः विभागे साकांक्षत्वमुपपादयति कल्पयामीत्यंत
स्येति तस्मिन्कस्मिन्निति उत्तरमंत्रस्य तस्मिन्निति अंशेन पूर्वमंत्रार्थगोचराकांक्षोत्थापकत्वात् स्वघटकयावदंशानां इतर
भावप्रयुक्ताकांक्षोत्थापकत्वस्य लक्षणोऽनिवेशादिति भावः किंत्विति यावदाशावत्साधारणरूपेण तत्प्रतीतिसामान्येच्छा राम०
रूपतात्पर्यविषयैक्यमित्यर्थः तेन प्रमाणचतुष्टयसाधारणत्वे न यावत्तात्पर्यविषयत्वेप्रसक्तिः तदिदमेकवाक्यत्वंप्र ६

त्यक्षादिग्रंथानामुपपादयति प्रवृत्तेतीति प्रमाणत्वेति प्रमाणचतुष्टयविवेचनमेवेत्यर्थः तात्पर्यविषयइति। अत्र विवेचने
प्रतीतित्वेनइच्छाविषयताचतुष्टयप्रतीतिविषयत्वेनइच्छाविषयेस्यैवांतरभेदोद्दिष्टम्यः विभागोस्याकांक्षत्वंदर्शयतिकार
णाकथनानंतरमितिअत्रसंगतेः एकवाक्यताव्याप्तिभंगमाशंकानिराचष्टेनचेतिविभिन्नतात्पर्यकेतीतिएकार्थतात्पर्य
कत्वमन्येपिउपाधिहेत्वाभासनिरूपणादौप्रसंगसंगतेःसत्वात् तन्निरूपणस्यप्रमाणचतुष्टयप्रतिपत्त्यनुपयोगित्वेननतत्ता
त्पर्यकत्वाभावात् नचउपाधिज्ञानस्यापित्वाभावज्ञानद्वारेणानुमानापयुक्तस्यपयोगितयाधर्मसंपादनद्वारेणचतुष्टयप्रति
पत्त्युपयोगित्वंसंभवत्येवेतिवाच्यं एवमपिशब्दादिनिरूपणेकथमपिप्रमाणचतुष्टयप्रतिपत्तितात्पर्यकत्वाभावेनतत्रसंग
तेव्यभिचारस्यदुर्वारत्वात् एवंरसमूलकादिनोपृथिवीजन्यत्वेनषट्जातिस्वराणामाकाशजन्यत्वेपितत्प्रतिपादकायुर्वेद
गांधर्वशास्त्रादौपृथिवीनिरूपणेकवाक्यत्वस्याभावेनव्यभिचारस्यदुर्वारत्वाच्चेतिभावःपरिहरतिएकवाक्यतापन्नयोरेवेति
अयंभावःसंगतिलक्षणेपीतिएकवाक्यतापन्नत्वेसतिप्रसंगाद्यन्यतमत्वस्यैवतल्लक्षणत्वंवाच्यमितिविभिन्नतात्पर्यके

७ संगत्यसत्वान्नव्यभिचार इति एतत्सत्वे एकवाक्यताप्रतिपत्तये संगतिं प्रदर्शयन्नित्यस्य स्वघटकतया एकवाक्यताप्रतिपत्तये सं
गतिं प्रदर्शयन्नित्यर्थो वाच्य इतिभावः अत्र वदंति अर्थैक्यादिति सूत्रे एकमंत्रताप्रयोजकमेकवाक्यत्वं आचार्यजैमिनेर
भिधीत्सितं। तत्र च शाब्देच्छागर्भमेव स्वार्थतात्पर्यघटकत्वं न तु प्रतीतिसामान्यगर्भं तथा सति दर्शितमंत्रयोरपि प्रकरणपाठप्र
योजकस्य उभयकरणत्वेन प्रागोगृह्य मित्याद्यानुमानिकप्रागविनियोगप्रतीतीच्छालक्षणतात्पर्यस्याक्षतया ऐकार्थ्यस्य दु
र्वारत्वात् न च स्वार्थज्ञानजन्यत्वेन तत्प्रतीतिविषयकेच्छैः वात्र तात्पर्यं विनियोगतात्पर्यं च न स्वार्थज्ञानजन्यत्वेन प्रतीतिं
विषयीकरोति किं तु स्वजन्यत्वादिना प्रतीतिविषयं यागादिकमेवेति न तादृशतात्पर्यमादाय तयोर्मंत्रयोरैकार्थ्यम् अत एव स
दनादिविशिष्टयागादिविषयिण्याः विनियोगप्रतीतेः विशेषणीभूतसदनादिज्ञानजन्यत्वस्य वक्तृतस्सत्वेऽपि न तदिच्छायाः
प्रतीत्वंशे तादृशजन्यतानवगाहित्वात्प्रकृते च अनुमानज्ञानजन्यत्वे नैव च तु ष्ठु प्रतिपन्नता विच्छेति तद्धंधेन तादृशतात्पर्य
निर्वाहः एवं च एकवाक्यताशरीरे नशाब्दप्रतीतिनिवेशावश्यकतेति वाच्यं एवं हि गौरश्वः पुरुषो हस्तीत्यादिवाक्यानामपि प एम०

थाकथंचित्स्वस्यवृद्धज्ञानाद्येकार्थतात्पर्यसंभवेनएकवाक्यतायादुर्वारत्वात्वृद्धज्ञताप्रतीतेः अर्थज्ञानजनकत्वेनैवेच्छावि
षयत्वादतश्शाब्दतात्पर्यस्यैवएकवाक्यताघटकत्वंवाच्यमितिकथमनुमानग्रंथस्यप्रत्यक्षग्रंथैकवाक्यताधूमोस्तीतिवा
क्यस्यवह्न्याविषयप्रमाणाच्चतुष्टप्रतिपन्नोन्तस्यशाब्दतात्पर्यासंभवात्प्रत्यक्षादिधर्मिचतुष्टयप्रतिपादनेचत्वार्येवप्रमाणानीति
प्रमाणचतुष्टुप्रतिपत्तेः मानस्यानुमित्यादिरूपायाः स्वतएवसंभवेनतत्रशाब्दतात्पर्यकल्पनस्यव्यर्थत्वात्यदिचकथंचिद्वै
तत्त्वत्रस्यैवशाब्दतात्पर्यनिवेशपर्यंतविभागोपयुक्तएकवाक्यतानिर्वचनपरत्वंप्रतीतिसामान्यनिवेशोनचविवक्षितैक
वाक्यतानिर्वचनपरत्वमितिउभयमेवान्तेवासिकाक— स्मात्आचार्यजैमिनिभिः एकशब्देनोपक्षिप्तंभोरम्भः प्रवृत्तोद्वतीसा
दिवाक्यानांचद्वितीयपक्षीयमेकवाक्यत्वमिष्टमेवेतिसमर्थ्यतेतदाअस्तुकथंचिदेकवाक्यत्वमितिअनुचितइतियद्यपिव्या
स्यनतरांपक्षधर्मतानिरूपणइत्यत्रमूलेईकारांतआसिपदाभावेपिआसीतिप्रतीकधारणस्यपक्षतायांदर्शनान्न्यायनियमः त
थापिउत्सर्गतोविद्यमानस्वरसंमिलितस्यैवप्रतीकस्यधारणमुचितंनतुअविद्यमानस्वरसम्मिलितस्येतितथाप्रतीकधारणं

८ 8

अत एव अनुपपन्न इत्यादि विहाय अनुचित एवोक्तमिति भावः प्रत्यक्षोपजीवकादिमूले प्रत्यक्षानुमानपदयोः कारणपर
त्वे फलनिरूपणासंगतिः फलपरत्वे कारणनिरूपणासंगतिः इत्युभयनिरूपणानिर्वाहाय उभयसंगतिप्रदर्शनपरत्वं मूल
स्यावश्यकमिति तत्त्वं तच्छक्तिद्वयेन प्रत्यक्षपदस्य भावकरणव्युत्पत्तिभ्यां च अनुमानपदस्य फलस्वरूपोभयपरत्वमिति मूला
शयं दर्शयति साहेति प्रत्यक्षप्रमीतीति दीधितिस्थानपदस्य प्रत्यक्षानुमानपदप्रतिपाद्यत्वावच्छिन्नपरत्वमित्यभिप्रायेणाह प्रत्य
क्षानुमानयोरिति प्रत्यक्षानुमानपदप्रतिपाद्यत्वावच्छिन्नयोरित्यर्थः। प्रत्यक्षानुमानपदोपस्थाप्यप्रकृतवाक्यप्रतिपाद्योपजीव
कोपजीविकभावफलनिरूपितस्वरूपनिरूपितश्चेत्याद्य इति परमार्थः अत एवेति उपजीव्योपजीविकभावरूपस्य विवक्षि
तत्वादेवेत्यर्थः प्रथममिति अन्यथा स्वरूपनिरूपणस्यैव प्राधान्ये तस्यैव प्रथमोपन्यासापत्तेरिति भावः स्वरूपनिरूपणस्यैव
प्राधान्यमभ्युपगम्य तयोरेव साक्षात्स्वगतकार्यकारणभावः फलद्वारकस्य कार्यकारणभाव इति एकत्रैव संगतिद्वयं प्र रा.म. ८
तिपादयितुं फलतइत्युक्तिः। इति केषांचि[illegible]व्याख्यानं दर्शयति केचित्त्विति कार्यकारणभावोपीति स्वरूपनिरूपितफलनिरूपि

घा

ते कार्यकारणभावद्वयमपीत्यर्थः स्वरूपयोरिति। स्वरूपयोरेवेत्यर्थः तयोरेव प्राधान्यादित्याशयः जिज्ञासोपयोगित्वादिति कि
मस्योपजीवकमिति वक्तिमेतत्फलोपजीवकफलकमिति जिज्ञासांतरस्याभिधानप्रयोजकस्य निमित्तनिर्वाहकत्वादित्यर्थः
आकूतिरित्यस्य स्वारसः तथा सति फलक इति फलस्य प्रथमोपादानविरोध इति न तु प्रत्यक्षफलस्यानुमितेरनुमेयस्य साध्यादेरित्यादि
ना प्रत्यक्षफलनिरासानुमितेरुपजीवकतायां निरूप्यतावच्छेदकधर्मव्यापकत्वप्रदर्शनमनुमितिनिष्ठप्रत्यक्षोपजीवकता
यामनुमितित्वव्यापकत्वप्रदर्शनं चानुपयुक्तं उपजीवकत्वादिसंगतेरनंतरमनभिहिते वस्तुनि व्यभिचारेणाभिधानव्याप्य
त्वाभावेन पूर्वाभिहितप्रत्यक्षैकदेशानिष्ठानुमितेरुपजीवकतायां व्यभिचारवारणार्थस्य निरूप्यतावच्छेदकधर्मव्यापकत्वस्यो
पजीवकतायां वैयर्थ्यात् अत आह उपजीवकत्वादिकं संगतिरित्यर्थः सा चेति उपजीवकत्वादिसंगतिश्चेत्यर्थः अनंतराभिधा
नेति च संगतेर्यन्निष्ठतया कथं ग्रंथकतानंतराभिधानव्याप्यतेति वाच्यं स्वाश्रयप्रतिपादकत्वसंबंधेन व्याप्तेर्विवक्षितत्वादि
त्याशयः न चानभिहिते पूर्वोक्तरीत्या व्यभिचारः अभिधानविशिष्ट-त्वं गतिर्यत्र तत्र तदनंतराभिधानमित्येव व्याप्तेरूपगमादिति

अत एवेति उपजीवकत्वादिसंगत्से आप्यत्वादेवेत्यर्थः इत्युक्तमितीति अन्यथा ज्ञापकपंचमानुपपत्तेरिति भावः प्राचामि
९ ति स्वयं निरूप्यतावच्छेदकधर्मव्यापकत्वविशिष्टत्वेनापि प्राग्रूपजीवकतया स्फुटत्वेपीत्यादिना स्वयं खंडनीयत्वादि भावः
9 अनुमित्यात्मके तिपर्वतो वह्निमानित्याद्यनुमितिजन्यवह्निमत्पर्वततज्ज्ञानदेशाद्यादि विशिष्टवैशिष्ट्यप्रत्यक्षत्येर्थः व्यभिचा
रादिति। तत्रानुमितिजन्यत्वाभावेन व्यभिचारादित्यर्थः पक्षातीति पक्षस्साध्यसाधनत्वेत्यर्थः ननु पक्षादीनामतींद्रियत्वेपि व्या
प्तिज्ञानादिकमादायैव प्रत्यक्षजन्यत्वमुपपाद्यतामत आह व्याप्त्यादिज्ञानस्यापीति गुरुत्वमाकाशसंयोगव्याप्यमूर्तिमात्रसम
वेतत्वात् इत्यादिरेकानुमितिरूपत्वादित्यर्थः पतनादिप्रत्यक्षस्येति गुरुत्वादिहेतुकानुमितौ गुरुत्वादिपक्षधर्मताज्ञानस्य हेतुत
यात् ज्ञानस्यानुमितिरूपतया तज्जन्यपतनादिप्रत्यक्षस्य गुरुत्वादिव्याप्तिग्रहे धर्मिज्ञानविधया गुरुत्वाद्यनुमितावेव पक्षधर्म
ताज्ञानविधया पतनादिप्रत्यक्षस्य हेतुत्वादित्याशयः ननु उपजीवकतायाः उपजीवकतात्वेनैव व्याप्यतास्तु तथा च प्रत्यक्षम राम०
पि अनंतरमेव निरूप्यतामिति शंकायां पुरस्कृतमित्यादि मूलमवतारयति ननु पक्षिंचित्प्रत्यक्षेति प्रयोजकतेति अनंतरमिधा ९

नं व्याप्यतावच्छेदकतयेत्यर्थः अवच्छिन्ननिष्ठ इति तत्तादृशानुमितिविभाजकोपाधिव्यापकत्वरूप इत्यर्थः उत्कर्षस्यानन्तराभि
धाने व्याप्यत्वासंभवादाह इत्यस्य सिद्धोपजीवकत्वेति प्रयोजकत्वस्यावच्छेदकतारूपत्वेपि यथाश्रुतमेव साध्यपरंपरेति साक्षा
त्परंपरासाधारणप्रयोज्यतात्वेनैव संगतित्वेत्यर्थः पक्षस्यफलत्वावच्छेदेनापीति तथा च निरूप्यतावच्छेदकधर्मव्यापकत्व
विशेषणतां व्यर्थमेवेत्यर्थः दीधितौ अदृष्टजननीमित्यादिसकलमेव प्रत्यक्षफलं अदृष्टजननीं समयपमत्कर्तव्यतादिपरिच्छेदि
कां अनुमितिउपजीवतीत्यन्वयः समयगोचरानुमितिमत्त्वे तत्साध्यत्वसमयगोचरानुमितेर्मत्त्वे तत्साध्यत्वगोचरानुमितेस्व
पागादिजन्यादृष्टद्वारकार्यमात्रं प्रतिकारणतया प्रत्यक्षमात्रस्यापि तादृशादृष्टद्वारा उक्तानुमितिजन्यत्वमस्ततमेवेत्यर्थः अदृष्ट
जननीमित्यस्य अदृष्टजननद्वारेत्येति पर्यवसितार्थो बोध्यः व्याख्यायां प्रत्यक्षफलमात्रे समयपानुमितिस्वपेक्षाप्रकारं दर्श
पतिकार्यमात्रं प्रतीति यागादिप्रवृत्तीति प्रवृत्तिजन्ययागजन्यमित्यर्थः वेदादिति लिङादिपदादित्यर्थः तत्रेति लिङ्पदजन्य
इष्टसाधनताशाब्दबोध इत्यर्थः शक्तिग्रह इति लिङ्पदस्य इष्टसाधनतायां शक्तिग्रह इत्यर्थः स चानुमितिरूप इत्याह तत्रेति

१० लिङ्पदमिष्टसाधनताशक्तं स्यात् तदभावे तद्बोधतात्पर्यकतद्दृष्टप्रयोगविषयत्वात् ओदनकामः पचेतेत्यादिलिङ्पदवच
10 दिति उक्तरीत्याशक्यानुमितिप्रयोजकत्वं प्रत्यक्षसामान्यस्येत्यर्थः मत्कर्तव्यत्वानुमितेः शक्यानुमित्यपेक्षया अतिशयं प्रद
र्शयतामादायैनोपजीवकत्वं प्रत्यक्षस्य दर्शयति साहचर्यावधानेनेति अल्पव्यवधानेनेत्यर्थः शक्तिग्रहस्य तदपेक्षया बहुव्य
वधानमिति भावः अनुमित्याकारं दर्शयति यागो मत्कृतिसाध्य इति मत्कृतिं विना सत्त्वे सतीति मत्कृत्यभावप्रयुक्ताभावप्रति
योगित्वे सतीत्यर्थः नान्तरीके व्यभिचारवारणाय विशेष्यं तत्र कृतेः साध्यताव्याप्तिविषयत्वाभावेन साध्यासत्त्वादिति भावः म
दिष्टसाधनत्वेति योगिमदिष्टसाधनं स्वर्गसाधनत्वे सति स्वर्गसाधनमत्कृतत्वात् इत्याद्यनुमितीत्यर्थः अत्र कृतिसाध्यत्व
इष्टसाधनत्वादेः शब्दाप्रामाण्येऽपि मद्गर्भत्वेन तयोः शब्दादलाभात् अनुमित्यैव तदूहो लम्भनीय इति भावः अदृष्टद्वारेणापि
प्रत्यक्षत्वावच्छेदेनानुमित्युपजीवकत्वमित्याशंक्य ईश्वरप्रत्यक्षमिति मूलं व्यतारयति नन्विति अनुमित्युपजीवकत्वं अदृ राम०
ष्टद्वारकानुमित्युपजीवकत्वमित्यर्थः ईश्वरप्रत्यक्षस्य फलत्वाभावे विप्रमिति विभाजकोपाधिप्रत्यक्षत्वव्यापकत्वस्यासम १०

थितत्वात् तस्यैवानुपपन्निरतो माधार्थेनाह तथा चेति फलतावच्छेदकावच्छेदेनेति तस्यैव निरूप्यतावच्छेदकतया निरूप्य
तावच्छेदकीभूतजन्यप्रत्यक्षत्वव्यापकत्वस्यानुमित्युपजीवकतया क्षतत्वादित्यर्थः शुद्धप्रत्यक्षत्वमेव निरूप्यतावच्छेदक
मत एव निफलतावच्छेदकनिरूप्यतावच्छेदकतयोर्भेद एव निरूप्यतावच्छेदकावच्छिन्नत्वमेव च संगतेरनंतराभिधानस्या
प्यताप्रयोजकमिति फलतावच्छेदकव्यापकत्वं च किंचित्कारमेवेत्यर्थः। निरूपितस्येति इंद्रियार्थसन्निकर्षोत्पन्नत्वेनैव प्रत्यक्ष
स्य निरूपणात् तज्जन्यप्रत्यक्षत्वमेव निरूप्यतावच्छेदकमित्यर्थः यथाश्रुते त्विष्टद्वारकस्यापि प्रवृत्त्यादिरूपद्विष्टद्वारकस्या
पि प्रवृत्त्यादिरूपद्विष्टद्वारकत्वाक्षतेराह दूषमात्रेति न क्षतिः नानुमित्युपजीवक[redacted]तायाः प्रत्यक्षत्वव्यापक
त्वापत्तिः अनुमितावित्तिनवानुमितौ द्विष्टद्वारकोपजीवकत्वस्याप्रयोजकत्वात्तस्य मध्यस्थसंगतिः अनुमितिपदस्यानु
मितिनिष्ठानंतराभिधानपरत्वात् नन्वद्विष्टद्वारकोपजीवकत्वस्यानंतराभिधानप्रयोजकत्वं स्वीकृत्य प्रत्यक्षस्यैवानंतराभि
धानमिति वैपरीत्यं किं न स्यादित्यत आह दीधितौ इतरस्येति अद्विष्टद्वारकस्येत्यर्थः अविनिगम्यत्वादिति उभयसाधारण्यात्वे

११ नानंतराभिधानव्याप्यत्वस्यैवविशेषादित्यर्थः। अन्यतरस्य पूर्वाभिधाननियमेन तत्रैव तादृशधर्मस्यानंतराभिधानव्य
भिचारादितिभावः व्याख्यायां ऐकतरप्यस्यप्राप्तिरिति एकतरमात्रवृत्तिताप्रयोजकं रूपं न तज्ज्ञानं वेत्यर्थः तादृशं च रूपमुप
जीवकतायामदृष्टाद्वारकत्वमेव इष्टद्वारकत्वं तु न तथा अन्यस्य एकतरमात्रवृत्तिताप्रयोजकोरूपावच्छिन्नस्यैवोपजीवक
त्वस्य उभयत्र सत्त्वात् तदेवाह नैकतरमात्रनिष्ठमिति। अनुमानफलेपीति अनुमानभूतानुमित्यादावपीत्यर्थः अनुमिति
जनकादृष्टस्यापि उपादानप्रत्यक्षविषयांशे प्रत्यक्षजन्यत्वादिति केचित् तन्न अदृष्टसमानाधिकरणप्रत्यक्षजन्यत्वस्यैव वि
वक्षितत्वेन ईश्वरप्रत्यक्षोपजीवकत्वस्य किंचित्करत्वात् किंतु अदृष्टजनकयागादिप्रवृत्तौपयिकहविराद्युपादानप्रत्यक्षोप
जीवकत्वस्यैवेवार्थ इति बोध्यं स्वरूपत इति स्वरूपस्यानुमानस्येत्यर्थः अनुमित्यात्मकेति परमाण्वाकाशसंयोगिगुरुत्वादित्या
दिस्थलीयानुमित्यात्मकव्याप्तिज्ञानेपीत्यर्थः परंपरायेति तादृशव्याप्तिज्ञानप्रयोजगुरुत्वादिनिर्णायकपतनादिप्रत्यक्षद्वारेणे राम०
त्यर्थः परंपरानादरेण साक्षाज्जन्यत्वनिवेशोपि नावश्यंभावीत्याह। वस्तुत इति अनुमानेपि प्रत्यक्षोपजीवकतायान निरूप्यताव ११

छेदकधर्मव्यापकत्वं ईश्वरप्रत्यक्षे व्यभिचारादितिशंकायां अनुमितिमित्यादिग्रंथमवतारयति ननु व्याप्तिज्ञानत्वेनैवेति न
नु जन्यत्वविशेषितेनैवेत्येवकारार्थः करणीभूतमिति अनुमितिकरणत्वरूपनिरूप्यतावच्छेदकधर्माक्रांतमित्यर्थः न किंचि
दिति तथा च व्यभिचारान्नोक्तव्यापकत्वमुपजीवकतायाइत्यर्थः उपादानप्रत्यक्षेति समवायेनानुमितिप्रतिविषयतासंबं
धेन ईश्वरीयप्रत्यक्षस्य साक्षाज्जनकत्वेपीत्यर्थः अनुमितिफलोपहितेति फलोपहितकरणत्वं हि व्यापारविशिष्टत्वे सति व्या
पारसंबंधावच्छिन्नजनकतावच्छेदकरूपत्वं अत एव छिदानुपधायककुठारव्यक्तिमादाय तत्कुठारेण छिनत्तीत्यादिको न प्र
योगः फलोपहितकरणत्वस्यैव तृतीयार्थतया तत्र तद्बाधात् तत्कुठारे व्यापारवैशिष्ट्यस्यानिवेशे तु तस्यापि फलोपहिततया ता
दृशप्रयोगस्य दुर्वारत्वादत एव तादृशफलोहितकरणताघटकव्यापारवैशिष्ट्यांशस्य व्यापारसत्तानिर्वाह्यत्वेन व्यापारस्य का
रणतानिर्वाहकत्वोक्तिः तथा च व्यापाराभावेन तद्वैशिष्ट्यगर्भकरणताभावं दृढयितुमप्रमज्ञानस्य व्यापारान्निर्द्धारयति विशेष
णाज्ञानत्वेनेतिनेनरूपे ,णास्वजन्यत्वेन्नासामानाधिकरण्येन स्वजन्यत्वं विवक्षितमिति अनुपदमेव वक्ष्यते विशेषणांशाम

१२ वेनकारणत्वाभावप्रतिपादनेऽपपत्तेर्व्यापारत्वं वंधावच्छिन्नकारणतावच्छेदकत्वस्वरूपविशेषणज्ञानस्येश्वरज्ञानेऽपत्वदर्शि
15 यितुं अस्मदीयव्याप्तिज्ञानानां स्वजन्यपरामर्शसंबंधेनैवानुमितिप्रतिकारणत्वमित्याह सर्वत्रेति तथा च तादृशव्यापारत्वं
वंधावच्छिन्नकारणतावच्छेदकव्याप्तिज्ञानत्वस्येश्वरज्ञानेऽपि सत्वं दर्शितविशेषणज्ञानत्वेन स्वजन्यत्वनिवेशनं सामानाधि
करण्यावच्छिन्नस्वजन्यत्वलाभायेत्याह विशेषणज्ञानत्वेनेति सामानाधिकरण्यावच्छिन्नजन्यत्वलाभस्य प्रयोजनमाह ईश्वरी
येति अत एवेत्यादिः नास्मदादीति अस्मदादिपरामर्शस्य सामानाधिकरण्येन तज्जन्यत्वादित्यर्थः किं त्वस्मदादीयव्याप्तिज्ञा
नतादृशफलोपहितमित्याशयः तथा चेति ईश्वरज्ञानस्यास्मदीयव्याप्तिज्ञाननिष्ठकारणतावच्छेदकव्याप्तिज्ञानत्ववत्वेऽपि ता
दृशव्यापाराभावेन तद्वैशिष्ट्यगर्भफलोपहितकारणताशून्यत्वादिति अत एवेत्यादित्यस्यार्थ इति भावः ननु स्वरूपयोग्यकारणा
स्यापि निरूपणीयत्वेन लक्ष्यतया स्वरूपयोग्यकारणत्वमेव निरूप्यतावच्छेदकं न त्वीश्वरज्ञानेऽपीति निरूप्यतावच्छेदकधर्मव्या एम०
पकत्वं प्रत्यक्षोपजीवकतायां न दवस्थमेवेति अनुशयेन निर्गलितं तात्पर्यार्थमाह नित्यस्येति जन्यव्याप्तिज्ञानत्वेनैवेति स्व १२

रूपयोग्यतालक्षणं कारणत्वमपि जन्यज्ञानत्वेनैव वाच्यमित्यर्थः एवं च फलोपहितकारणत्वं स्वरूपयोग्यतालक्षणं वा निरूप्य
तावच्छेदकं स्वच्छंदमस्तु उभयथापि निरूप्यतावच्छेदकधर्मव्यापकत्वं प्रत्यक्षोपजीवकत्वस्य न हीयत इत्याशयः एतेनेति फलो
तकारणत्वेन प्रत्यासत्तिव्याप्यतया प्रत्यासत्त्यभावेन फलोहितकारणताभावस्य उक्तत्वादेवेत्यर्थः अप्रत्यासत्त्यापीति स्वज
न्यप्रमितिरूपस्यापि सत्यभावेपीत्यर्थः कारणतात्वस्वजन्यप्रमितिसंबंधावच्छिन्नगृहीयदंडकारणतावच्छेदकदंडत्ववत्वात् न कारण
ताभावेति प्रत्यासत्त्यभावत्वं न कारणताभावव्याप्यतावच्छेदकं तथा च कथं प्रत्यभावेन ईश्वरज्ञानस्य कारणताभावसमनर्थन
मितिभावः सामान्यत इति फलोपहितकारणताभावत्वेनैव व्यापकतायाश्चाभिहितत्वेन कारणत्वरूपसामान्यधर्मावच्छिन्नाभा
वत्वेन व्यापकतायाश्चानभिहितत्वादित्यर्थः ये तु व्यधिकरणपरामर्शस्य व्यापारतावारणाय विशेषणाज्ञानविषयास्वजनित्स
त्वस्य निवेशस्य सोपहितपरामर्शत्वेनैव व्यापारतात् तत्संबंधावच्छिन्नकारणत्वमेव च फलोपहितकारणत्वमितिमताश्रयेणादीधि
ति कृतामीश्वरज्ञानस्य कारणत्वखंडनं न संमृष्यंते तान् व्यधिकरणव्याप्तिज्ञानस्यापि व्यधिकरणानुमितिफलोपहितकारण

१२ त्वापन्निचयेदितिकथानिरस्तमित्यत्वितिध्वजन्यव्यापारसंबंधेनेतिसोपहितत्वारसंबंधेनेत्यर्थःअनुमितिफलोपहितमिति
ताद्दशव्यापारसंबंधावच्छिन्नकारणतावच्छेदकधर्मवत्वेसतिताद्दशव्यापारोपधायकत्वस्यैवानुमितिफलोपहितत्वरूप
13 त्वादित्यर्थःव्यापारोपधायकत्वमेवकथमित्यतआहकार्यमात्रइतिएवंसतीतिविशेषणाज्ञानत्वेनस्वजन्यत्वमनिवेश्यसो
पहितव्यापारसंबंधावच्छिन्नेसादिरूपफलोपहितकारणताविवक्षणादित्यर्थःव्यधिकरणेतिवैजात्यव्याप्तिज्ञानस्यमैत्रीयप
रामर्शेव्याप्तिज्ञानत्वेनसमवायेनउपधायकत्वाभावेपिकालोपाधिविषमाउपधायकत्वस्याक्षततयामैत्रीयानुमितिंप्रती
तेनसंबंधेनफलोपहितकारणप्रसंगात्विशेषणाज्ञानविधयास्वजन्यपरामर्शत्वेनैवव्यापारतावश्यमाश्रयेयेतिकथंता
द्दशादुर्मताश्रयेणदीधितिमंडनप्रस्याशेस्कपहसतिविशेषणाज्ञानत्वेनेति।जलव्याप्तिज्ञानत्वस्यकारणतावच्छेदककोटि
निवेशावेयर्थ्यशंकतेनचयेनकेनापीतिफलनिष्ठकार्यतानिरूपितकारणतावच्छेदकयत्किंचिद्रूपवत्वेसतियत्किंचित्संबं राम. १२
धेनफलविशिष्टत्वमेवफलोहितत्वपदार्थइतिईश्वरज्ञानस्यताद्दशकारणतावच्छेदकघटत्यसत्वेसतिफलनिरूपितविषय

तासंबंधघटितसामानाधिकरण्यरूपफलसंबंधस्येश्वरज्ञाने संभवात्व्यभिचाराभावेन जन्यत्वनिवेशवैयर्थ्यात्तत्र साक्षो
पजीवकतायाः अनुमितिकारणत्वव्यापकत्वभंगो दुष्परिहर एवेत्याशयः स्वरूपयोग्यतेति तद्घटकस्य समवायादिघटित
सामानाधिकरण्यमेवेति तद्घटितफलोपधानस्येश्वरज्ञाने भावेन व्यभिचारापत्त्या जन्यत्वविशेषणमावश्यकमेवेति भावः
अन्यथेति यत्किंचित्संबंधघटितफलोपधानस्यैव व्याप्तौ निवेशादित्यर्थः द्रव्यत्वरूपेणेति द्रव्यत्वादेर्घटजनकतावच्छेदकत्व
करणं एतन्नियमफलं व्यापकीभूतफलोपधानाभावेन गगनादेर्निरस्तत्वविशिष्टस्वरूपयोग्यत्वाभावसिध्यं द्रव्यत्वादेः स्वरूपयो
ग्यतात्वाभावमादायैव पर्यवस्यतीति व्याप्याभावोस्थापनमुखेन एतन्नियमस्य निरस्तवृत्तिधर्मकार्यतावच्छेदकत्वविरोधित्वात्
यत्किंचित्संबंधघटितफलोपधानत्वेन व्यापकतायां गगनादौ व्यापकस्यैव सत्त्वेन द्रव्यत्वादौ अवच्छेदकत्वाभावासिद्धेः उक्त
नियमस्वीकारो निष्प्रयोजनस्स्यादेवेति भावः प्रत्यासत्तिपदं सामानाधिकरण्यपरतया व्याख्याय परामर्शत्वेनैवानुमितिक
रणत्वमिति मताभिप्रापकतयाएतद्दूषं व्याचक्षाणानां मतमाह फलायोगेति परामर्श इति ननु व्याप्तिज्ञानमित्यर्थः न स्यप

१४ 15 रामर्शानुसारात्तद्दशायां फलायोगस्यैव संभवात्सामानाधिकरण्यमिति समवायघटितं सामानाधिकरण्यमित्यर्थः ननु स्वरूपयो
गस्यापि निरूपितत्वस्वरूपयोगपत्वमेव निरूप्य तन्नावच्छेदकसमो दोषस्तदवस्थ एवेत्यत आह फलोपहितेति अत एवेति स्व
रूपस्य लक्षणत्वे तदूधविरोधापत्तेरिति भावः प्रत्यासत्तिविरहेणेत्यस्यार्थमाह फलसामानाधिकरण्येति तादृशफलेनेति तादृ
शफलसामानाधिकरण्यविशिष्टकारणत्वाभावादित्यर्थः कश्चिदित्यस्याशयः स च प्रत्यासत्तिपदस्य कारणतावच्छेदकसंबंधपर
तापरित्यागएव प्रत्यक्षकारणतावच्छेदेनेति तदवच्छिन्नोपजीवकत्वस्य प्रत्यक्षव्यतिरेकमाहेत्यर्थः अभिज्ञानत्वेनैवेति ननु ज
न्यत्वनिवेशाद् इत्यर्थः ननु उक्तनियमविरोधः इत्यतो नियमस्यैवासत्त्वमाह नियमस्येतीति तथा च ईश्वराभिज्ञानस्यापि अनु
मानत्वात् अवच्छिन्नोपजीवकतामासंगति वोधएवेत्याशयः दृष्टद्वारावेतीति तथा च सामानाधिकरण्येन उपजीवकत्वमेव सं
गतिः तत्र च परंपरासाधारणप्रयोजनत्वरूपोपजीवकत्वस्य निवेशे वैयर्थ्यम् साक्षाज्जन्यत्वरूपमेवोपजीवकत्वं प्रकृते निवेश्य राम०
मिति प्रत्यक्षत्वसामानाधिकरण्येनापि अनुमानजन्यत्वस्याभावान्न वैपरीत्यप्रसक्तिः एवं च दृष्टद्वारावेति यथाश्रुतपरंप १४

रोपजीवकत्वपक्ष एवादृष्टद्वारकविपरीतोपजीवकतावारणाय अदृष्टाद्वारकत्वविशेषणानिवेशनपक्षान्तरप्रदर्शन
परन्तुजन्यत्वानिवेशपक्षे तन्निवेशपरं इदं त्वेवक्षोंचिद्व्याख्यानं जन्यत्वनिवेशपक्षेपि एतद्विशेषणस्यावश्यकताप्रदर्शि
नेन निराकुर्वन् दृष्टद्वारावेतस्यानिर्गलितं तात्पर्यार्थमाह तथा चेति करणतावच्छेदकेति निरूप्यतावच्छेदकेत्यर्थः स्वजनकेति
स्वनिरूप्यत्वेनाभिमतं तथा च तज्जन्यादृष्टाजन्यत्वे सतीति तन्यमेव तदानं तर्पाभिधानप्रयोजनकमित्यर्थः इंद्रियजन्यादृष्टाज
न्यत्वे सतीइंद्रियजन्यत्वस्य अनुमानत्वसामानाधिकरण्येनाक्षतत्वादिति भावः वैपरीत्यं वारयितुमाह इंद्रियत्वेति स्वजका
दृष्टेत्वस्य पूर्ववदेवार्थो बोध्यः अपि हि अवच्छिन्नोपजीवकतायाः सुतरामसंभवप्रदर्शनपरा इत्याह अपि नेति। उपजीवक
तायाः जन्यतारूपत्वविवक्षण एव सामानाधिकरण्येन दृष्टाद्वारकस्याप्युपजीवकत्वस्य निवेशार्हत्वमिति तस्य जन्यता
रूपत्वविवक्षार्थं शंकते नचयज्ञेतिपूर्वं चक्षुरितिमहाचक्षुर्नाशानन्तरमित्यर्थः चक्षुरंतरेति खंडचक्षुरुत्पादइत्यर्थः उपजी
वकमेवेति परंपराप्रयोज्यमित्यर्थः घर्षणविशेषजनकहतिसाध्यतानुमितेः प्रवृत्तिघर्षणादिद्वारेनेव खंडचक्षुरुत्पादकत

१५ याऽदृष्टस्य द्वारकोपनिवेशनीयादिति भावः प्रकृष्टचक्षुरिति श्रोत्रघ्रपानारम्भावयवोत्तरैः पूर्वावयवैस्सम्मिलितारब्धेम
15 हाचक्षुषीत्यर्थः पूर्वत्र महाचक्षुं चाशेष अवस्थितैरेवावयवैः खंडचक्षुरारंभोनावयवांतरैरिति विशेषः जनकत्वाभावादिति
कस्मात्कस्तु उपजीवकत्वजन्यत्वरूपमेव एतत्कत्वे विवक्षितमिति भावः अदृष्टद्वारकस्य अखंडचक्षुरादेरपि जन्यत्वनिवेशे
न वारणो अदृष्टद्वारकस्य त्वेस्तु नरामेवम्प्रत्यक्षप्रामाण्यस्य अनुमानोपजीवकत्ववारणमिति अदृष्टद्वारकत्वविशेषणा
स्य निवेशनादीधितीकृतामतीव निरालंबनमिति यांकतेन चैवमिति एवं उपजीवकत्वस्य जन्यत्वरूपस्य विवक्षणे व्यर्थ
मिति निरूप्यतावच्छेदकधर्मसामानाधिकरण्येन जन्यत्वेनैवानंतर्याभिधानप्रयोजकत्वसंभवादिति भावः ईश्वरज्ञानस्या
पीति स्वरूपयोग्यत्वस्यैव लक्ष्यतावच्छेदकतामाश्रित्यैव सामानाधिकरण्येनेति द्वितीयकल्पस्य प्रवर्त्तयानित्यस्येत्यादिग्रा
ते प्रयोजकत्वे तु ईश्वरज्ञानस्यापि स्वरूपयोग्यतालक्षणानुमितिकरणतासंभवादित्यर्थः तद्वारणायेवेति तज्जन्यतामा
दाय चक्षुरादावनुमानोपजीवकतावारणायेत्यर्थः तदुपादानादिति अदृष्टद्वारकत्वोपादानादित्यर्थः तथा च तज्जन्या एम० १५

दृष्टजन्यत्वेसतितज्जन्यत्वस्यैवतत्त्वंतत्राभिधानप्रयोजकतयाचक्षुरादावीश्वरज्ञानरूपानुमानजन्यत्वसत्त्वेपितज्जन्या
दृष्टजन्यत्वात्नविशिष्टोपजीवकत्वसत्त्वमितिनव्यभिचारइतिभावः अत्रेदंविचार्यतेफलयोःस्वरूपयोर्वाउपजीव्योप
जीवकभावःसामानाधिकरण्यसाधारण्येनविवक्षितःकिंवानुमितेःस्वसमानाधिकरणप्रत्यक्षोपजीवकत्वंतत्स्वरूपीयानु
मानस्यतत्स्वरूपीयप्रत्यक्षप्रमाणजन्यत्वमित्येवंसामानाधिकरण्यगर्भमेवोपजीवकत्वंविवक्षितंआद्येफलोपजीवकता
यामदृष्टद्वारकत्वनिवेशोनिरूप्यतावच्छेदकधर्मव्यापकत्वनिवेशोपिचविशेषणाद्यावच्छिन्नमपिअनुमानोपजीवकत्वं
प्रत्यक्षेदुर्वारंअनुमित्यनुव्यवसायादिवत्घटादिप्रत्यक्षस्यापिस्वविषयघटाद्युपादानगोचरप्रवृत्तिजनकानुमानोपजी
वकत्वात्स्मरणाकाशसंयोगिगुरुत्वादिसाध्यानुरोधेनपरंपराकामाचारस्यप्रयोगेवक्तुंशक्तितत्वात् अथमानसघटादिप्र
त्यक्षेव्यभिचारःश्रावणप्रत्यक्षेशब्दसुखादिप्रत्यक्षस्यएवव्यभिचारःतद्विषयप्रत्यक्षश्रावणादेःजन्यत्वजन्यत्वादितिचेत्न
स्यापिजालकचक्षुःसंयोजनभेरीभंडाहननादिप्रवृत्त्यौपायिकानुमानोपजीवकत्वात्वक्तुंतत्सर्वस्यैवप्रत्यक्षस्यशरीरजन्य

१६ 16

त्वात्तस्यचोत्तरोत्तरस्यत्वनाशाद्वारापूर्वापूर्वशरीरजन्यतयापूर्वपूर्वशरीरस्यचजीवनद्वाराद्यशरीरावच्छिन्नस्तनपानप्र
वृत्तौवैकात्म्यमानोपजीवकत्वान्नव्यभिचारः नचाद्यशरीरावच्छिन्नएवप्रसक्तेव्यभिचारः तस्यस्तनपानाद्यसंयोज्यत्वा
दितिवाच्यं तस्यापिमुक्तशोणितसंयोगनिमित्तकत्वेनपरंपरयातत्संयोजकत्वपित्रादिप्रवृत्तिजन्यत्वात् नचायोनिज
दूर्व्यनारकीयादिशरीरावच्छिन्नप्रसक्तेव्यभिचारः तादृशशरीराणामदृष्टमात्रलभ्यत्वादितिवाच्यं देवादिशरीराणा
मपिस्वजनकतादृष्टावच्छेदकजातीयपूर्वशरीरनाशजन्यतयादोषताववस्थानात् नचपूर्वशरीरनाशस्यउत्तरशरीर
हेतुत्वमस्तिइंशरीरस्यस्थायावयवावच्छिन्नोत्तरशरीरविरोधित्वेपिस्वावयवांतरावच्छिन्नशरीरोत्पत्तावविरोधित्वात्
अन्यथाका-हनुपपत्तेरितिवाच्यं कामशरीरेषुपूर्वशरीरस्याविरोधित्वेपिकर्मजशरीरेषुतद्विरोधितायावश्यक
त्वात् अन्यथाएकस्यैवात्मनोयुगपदनेकशरीराधिष्ठानापत्तौ अदृष्टेतत्सिद्धांतएवोपरंहितस्याकायव्यूहेअनेकशरी राम०
रस्यत्वेपियुगपदधिष्ठानानभ्युपगमान्नदोषः अस्तुतर्हिकामशरीरेषुपूर्वशरीरस्याविरोधितयातादृशसोभर्यादि १६

शरीरावच्छिन्न एव प्रत्यक्षे व्यभिचारः न च योगानुप्रवृत्तिजनकानुमितेस्तत्र प्रयोजकत्वसंभवदयोगजादृष्टद्वारैव तत्स्मा
त्ता दृशशरीरेपयोगादितिचेन्न तस्यापि पूर्वशरीरावच्छिन्नसंकल्पजन्यतया पूर्वशरीरजन्यत्वात् न च योगिनां संकल्पज
शरीरोपगमे अपसिद्धान्तः अदृष्टानपेक्षतया तथात्व एव विरोधान्न तस्मात्साधारण्येनउपजीवकतापक्षो न क्षोदक्ष
मः अस्तु तर्हि तत्पुरुषीयानुमितेस्तत्पुरुषीयप्रत्यक्षोपजीवकत्वमित्येवं सामानाधिकरण्येनावच्छिन्नोपजीवकत्वमेवानं
तर्यनियामकमित्याद्यः पक्ष एव एवं चाद्यशरीरावच्छिन्न एव प्रत्यक्षे व्यभिचारस्तु स्थित इति न पि पर्यायप्रसंग इति चेन्न अ
स्तु तावदेवं तथापि प्रत्यक्षमात्रे आत्ममनस्संयोगस्य हेतुतया मनः संयोगस्य हेतुतया मनः संयोगमादायैव प्रत्यक्षमा
त्रे अनुमितेरुपजीवकत्वं दुर्वारं तथाहि आत्ममनः संयोगं क्रियाजन्य एव वाच्यः क्रियायाश्च पूर्वसंयोगस्तद्द्वारेणोवविभा
गजनकत्वमिति पूर्वदेशसंयोगः पूर्वतरसंयोगाधीनः सोपि तादृशसंयोगान्तराधीन इति पूर्वसंयोगपरंपरायाः तादृशपू
र्वसंयोगजनकमनःक्रियाप्रयत्नाधीनात्तादृशसंयोगद्वारेण मनः क्रियागोचरप्रवृत्तिजनकसमानाधिकरणानुमितेरुप

७ 17 जीवकत्वस्यापि तादृशप्रत्यक्षे अक्षमत्वात् न च मनःक्रियायाः प्रयत्नजन्यत्वमसिद्धमपेक्षितविषयग्रहणानुपपत्तेः
अत एव प्रयत्नादृष्टपरिग्रहादिति सूत्रे कश्चित्प्रयत्नपरिग्रहात् कश्चिद्दृष्टपरिग्रहात् मनसि क्रियेत्याचार्याः न च अदृष्टाधी
नक्रियास्थले मनःसंयोगजन्यप्रत्यक्षस्यानुमित्यनुपेक्षणात् व्यभिचार एवेति वाच्यं तत्क्रियाव्यक्तिमादाय तादृशप्रत्यक्षे अ
नुमित्सोपजीवकत्वसंभवेपि तत्क्रियाव्यक्तिसहकारीभूतपूर्वसंयोगजनकक्रियापरंपरायत्किंचित्क्रियाव्यक्तिमादायैव वा
नुमित्सोपजीवकत्वस्य दुर्वारत्वात् सर्वत्रैवोत्तरसंयोगे स्वजनकविभागप्रतिक्रियापूर्वसंयोगयोः तुल्यवद्धेतुतया पूर्वपूर्वतत्पू
र्वतमादिसंयोगप्रणाड्यां यत्नैव पूर्वसंयोगव्यक्तौ प्रयत्नाधीनक्रियायाः विभागजनकत्वं तत्र तत्सहकारिपूर्वसंयोगपरि
त्यागेन तादृशक्रियातज्जन्यसंयोगादिप्रणाडिकाचारेण अनुमित्सोपजीवकत्वस्य दुर्वारत्वात् न च मनसो दीर्घतया क्रियागो
चरप्रवृत्त्यनुपपत्तिः उपपादानप्रत्यक्षविरहादिति वाच्यं तत्सा[redacted]धिकप्रवृत्तावेवोपादानप्रत्यक्षस्य हे राम·
तुतया मनःक्रियोद्देश्यकप्रवृत्तौ तस्याहेतुत्वात् अन्यथा वाय्वादिक्रियोद्देश्यकव्यजनादिक्रियाप्रवृत्तेरनुपपत्तेः एवं च प्रत्येपि १

मनःक्रियोद्देशकमनोवहनाडीक्रियागोचरयत्नस्येश्वरजनीन्यत्तद्वारेणाव्यस्तक्षमात्रेनुमितस्य पजीवकतायाः दुर्वारत्वात् अ
तएव यथाद्रष्टालोके कृतिसाध्यताज्ञानकारणताविचारेणपंचकसंचारे यत्नस्याप्रयोजकत्वेन मनोवहनाडीवत्प्राणवहना
डीगोचरयत्नस्याप्रवृत्ता विशेषापत्तिरिति सिद्धवद्वेवमनोवहनाडीवदिति क्रमिश्रैः यत्तु यत्नस्य पुंसः प्रवृत्तिजन्या मनःक्रिये
वनास्ति किं दृष्टजन्यैकवत्तदृ यत्नस्येव्यभिचार इति तन्न विंसात तस्माज्जन्मांतरीयमनःक्रियागोचरप्रवृत्तेर्दुर्वारत्वात्
नचतत्रापि प्रवृत्तिर्नानीत्येवं वक्तुं शक्यं शरीरारंभानुपपत्तेः नचजन्मांतरसाधारणादृष्टप्रयोज्यकत्वं तत्र भवंतो नमन्यं
तेज्ञातमात्रयत्नस्यानप्रवर्तकत्वानुमितेः जन्मांतरीयया प्रवृत्तिभवमूलकत्वसिद्धांतात्तस्मादवच्छेदकावच्छेदेनादृष्टा
द्वारकोपजीवकत्वस्यानुमानफलेव प्रत्यक्षफलेपि सामानाधिकरण्यानुमितिमादाय सत्वं दुर्वारमेवेति स्थितं एवं समा
नाधिकरण्यघटितोपजीवकत्वविवक्षणेश्वरत्वेपोपजीवकतायाः अदृष्टाद्वारकत्वप्रयोजकत्वविशेषणानिवेशवैयर्थ्यात् तन्नि
वेशेपि खंडचक्षुषादेः घर्षणादिप्रवर्तकानुमानोपजीवकतामादाय दोषवारणाय जन्यत्वनिवेशस्यावश्यकतया दृष्ट

१८ श्वरके जन्यत्वाभावेनैव वारणात् ईश्वरज्ञानस्य एतत्कल्पे अनुमानत्वाभ्युपगमेपि तस्य तत्पुरुषीयत्वानुमानाभावे
18 नतज्जन्यत्वाभावादाद्यदोषवारणाय स्वजनकादृष्टाजनकत्वविशेषणलाभपरत्वेनापि अदृष्टद्वारकत्वोपादानवैयर्थ्य
वज्रलेपायितमेवेत्यलं प्रसक्तानुप्रसक्तिकया एतावता ग्रंथेनोपजीवकत्वादिति पंचम्यनुरोधेन संगतेरानंतर्याभि
धानव्याप्यत्वं स्वीकृत्य प्रत्यक्षे अनुमानोपजीवकत्वसमर्थनेन वैपरीत्यं वारितं संप्रति संगतेरानंतर्याभिधानव्या
पकत्वमेव न तु व्याप्यत्वमतः उपजीवकतायाः तुल्यत्वेपि न संगतित्वहानिः इति सिद्धांतयति उपजीवकत्वादेरानंतर्या
भिधानव्यभिचारं शंकते दीधितौ अथोपजीव्यमिति उपजीवकमनंतरमभिधीयत एवेति न नियम इत्यर्थः क्वचित्का
र्यनिरूपणात् क्वचित्कार्यस्य पूर्वमपि निरूपणेन तत्रानंतराभिधानस्य व्यभिचारादित्यर्थः व्याख्यायां हेतुपंचम्यंतानुपप
त्तिरिति धूमाद्वह्निमानितिवत् उपजीवकत्वादंतरनिरूप्यत इति हेतुपंचमि व्याप्यताभावेऽप्युपपन्ने इत्यर्थः यथा त्रैवेति राम-
अनुमानग्रंथ एवेत्यर्थः तत्कारणनिरूपणमितीति न च तदीयनिरूप्यतावच्छेदकरूपाघटकत्वविशिष्टतदुपजीवकत्वे १८

नैवमनंतराभिधानव्याप्यत्वं अनुमितेस्तु अनुमाननिरूप्यतावच्छेदकानुमितिजनकत्वघटकतया केवलोपजी
वकत्वसत्वेपि नष्टमितिदिति वाच्यं अप्रयोजकत्वादिति भावः किंचात इतिस्त्रि ज्ञानतात्पर्यं दर्शयितुमादौ पंचम्युपपत्तिं दर्शि
पतितं ज्ञानेति साक्षात्परंपरासाधारणप्रयोज्यतामात्रस्य पंचम्यर्थतया स्वज्ञानं तज्जन्यजिज्ञासादिद्वारकप्रयोज्यतायाम्पि
ताद्रूप्येण प्रयोज्यतात्वेन वा पंचम्यर्थतायां विरोधाभावादित्यर्थः ननु तज्ज्ञानज्ञाप्यत्वमितिपि न वाक्यार्थ वाधस्यादिति भा
वः तादृशनियमाभाव इति उपजीवकत्वादेः अनंतरोभिधानव्याप्यताभावइत्यर्थः व्याप्यत्वस्यैवेति अनंतराभिधानव्याप्य
तावच्छेदकं यद्रूपं तद्रूपावच्छिन्नस्यैव संगतिपदार्थत्वं तादृशावच्छेदकं च अनुमाननिष्ठप्रत्यक्षोपजीवकतायां तद्दृष्टाद्वा
रकत्वनिरूप्यतावच्छेदकत्वधर्मव्यापकत्वोभयावच्छिन्नत्वमेव अतः प्रत्यक्षोपजीवकतयैव संगतिः ननु प्रत्यक्षनिष्ठानु
मानोपजीवकतापि निरूप्यतावच्छेदकधर्माघटकत्वविशेषणाद्यनानुमित्यादावपिव्यभिचार इति प्राचीनमतं निर्गलि
तार्थः नहीतीति नहि संगतित्वमनंतराभिधानव्याप्यत्वघटितं निस्यर्थः लक्षणपदेन व्याप्यताभावस्यैव लाभात् तत्स्यता

१९ 19

दृशव्याप्यत्वघटितत्वं वाधितमेवेत्याशयः लक्षणाप्रदर्शनं विनाव्याप्यत्वाभावानिर्द्धारणात् तन्निर्द्धारणाय लक्षणप्रदर्शनमि
त्याह संगतिलक्षणेति अपशब्देन प्रमाणाभावपरिग्रहः अंतर्याभिधानेति अनंतरमेवानंतर्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् तादृ
शं च तदभिधानं चेति कर्मधारयः यद्ज्ञानमनंतराभिधानप्रयोजकजिज्ञासाजनकं तत्वं अनंतराभिधानप्रयोजक [redacted] स्वज्ञानजन्यजिज्ञासाकत्वमिति यावत् तथा च सज्ज्ञानादिद्वारोपजीवकत्वादेरनंतराभिधा
नप्रयोजकत्वं स्वकारणव्यापकताविशेषरूपस्य लक्षणतो लाभात्तु अधिकदेशवर्तिन एव प्रायशो व्यापकत्वात् व्याप्यत्वाभा
व एव लक्षणतो लभ्यत इत्याशयः जिज्ञासाजनके निघटत्वप्रकारकं ज्ञानं जायतामित्याकारकादिवत्किंचिद्धर्मव्याप्यत्वापुरस्क
रेण घटकादिप्रकारकज्ञानेच्छाजनकज्ञानविषये घटादेः सद्ज्ञान एवातिव्याप्तिवारणाय एतदर्थः प्रयोजकांतमिति उक्तघटक
प्रकारकज्ञानेच्छा चनानंतराभिधानप्रयोजिका व्याप्यत्वपुरस्कारेण किंचिद्धर्मप्रकारकेच्छाया एव तत्प्रयोजकत्वात् अत ए ग.म.
व प्रकृते किमस्य कार्यमिति जिज्ञासायाः कार्यत्वरूपसामान्यधर्मव्याप्यत्वेन विशेषणधर्मविषयिण्या एव लक्षणसमन्व १९

यौपयिकतया तत्संभवप्रकारं दर्शयति प्रत्यक्षस्येत्यादि इदं प्रत्यक्षं सकार्यकं कारणत्वादित्यनुमानेन घटादौ कार्यसामान्यमि
त्यर्थः सामान्यज्ञानमित्यर्थः किमस्य कार्यमितीति एतस्याश्च जिज्ञासायाः कार्यत्वव्याप्यत्वेन तद्विशेषणधर्मप्रकारकत्वाद्
वस्य न तदभिधानप्रयोजकत्वं जिज्ञासाधारनं तदभिधानप्रयोजकत्वं विवृणोति ततः शिष्यस्येति ज्ञानेच्छायाः फलेच्छावि
षयात्तदुपायीभूतगुरुवाक्यश्रवणीयजिज्ञासाबोधकवाक्यादौ विच्छया स्वीयतादृशवाक्यप्रयोग इत्यर्थः ततः इष्टसाधनतेति स्व
वाक्ये शिष्यगत विशेषधर्मप्रकारकज्ञानात्मक इष्टसाधनताज्ञानमित्यर्थः तद्विषय इति विशेषधर्मप्रकारकज्ञानेच्छाजनकं
यद्विशेषधर्मप्रकारकज्ञानविषयकेष्टसाधनताज्ञानं तद्विषये विशेषप्रकारकज्ञाननिष्ठेष्टसाधनत्वेतिव्याप्तिरित्यर्थः
समानविशेष्यकत्वेति इष्टसाधनताज्ञानस्य समानविशेष्यकत्वप्रसा सत्त्वेव जनकत्वान्न तद्विषये इष्टसाधनत्वेतिव्याप्ति
रित्यर्थः कार्यत्वप्रकारकज्ञानस्य तु विभिन्नधर्मिकतयैव इच्छाजनकत्वं कार्यत्वप्रकारकज्ञानस्य विषयतया घटादौ सत्त्व द्विशे
षणाधर्मप्रकारकज्ञानेच्छायाश्च ज्ञानएव सत्तादिसाशयः यत्प्रकारकज्ञानत्वमिति तादृशाजनकज्ञाननिरूपितप्रकारतासंबंधा

२० 20 वच्छिन्नावच्छेदकताश्रयीभूतो यो धर्मस्तत्त्वमित्यर्थः इष्टसाधनतायाः प्रकारतासंबंधावच्छिन्नजनकतावच्छेदकत्वेपि जनकता
यांसमानविशेष्यकत्वानवच्छिन्नत्वविरहात् नातिप्रसंग इत्याह इष्टसाधनताज्ञानस्येति ननु कार्यत्वप्रकारकज्ञानस्यापि वि
शेष्यासंबंधेन घटादाविव विशेषधर्मप्रकारज्ञानेपि सत्त्वेन समानविशेष्यकत्वप्रत्यासत्त्यैव हेतुत्वमिति कार्यत्वादौ लक्षणा
व्याप्तिः अत आह ननु कार्यत्वेति घटज्ञानेपीति घटमात्रज्ञानेपीत्यर्थः तथा च क्वचित्समानविषयकत्वसंभवेपि सर्वत्र तथा
त्वासंभवात् न सामान्यधर्मप्रकारकज्ञानस्य समानविशेष्यत्वप्रत्यासत्त्याविच्छिन्ना हेतुत्वमित्याशयः यत्तु समानविशेष्य
त्वप्रत्यासत्त्यनवच्छिन्नस्यैव जनकताया निवेशे कार्यत्वादावेव संगतिलक्षणाप्रसिद्धिः कार्यत्वव्याप्यधर्मप्रकारकज्ञानत्वा
वच्छिन्नविशेष्यकेच्छायां तादृशज्ञानत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्यैव हेतुत्वात् तथा कार्यत्वप्रकारकज्ञानाभावदशायां ता
दृशेष्टसाधनताज्ञानाभावादेव विशेषधर्मप्रकारकज्ञानेच्छाविरहात् इष्टसाधनताज्ञानवह्निर्भावेन कार्यत्वप्रकारकज्ञानहेतु रामः
त्वएवमानाभावात् इष्टसाधनताज्ञाननिष्ठजनकतावच्छेदकतयैव कार्यत्वे लक्षणास्य समन्वयः तथा समानविशेष्यकत्वप्र २०

सामस्त्यानवच्छिन्नत्वनिवेशेऽलक्षणासंभवस्येवप्रसंगादिति तदपेक्षालोऽस्वरूपसंबंधावच्छिन्नकार्यत्वप्रकारकज्ञानस्येवविशे
षधर्मप्रकारकजिज्ञासाहेतुतयानिरूपितत्वसंबंधेनव्यासंगोकार्यत्वप्रकारकस्य इष्टसाधनताज्ञानस्यसामान्यधर्मप्रकारकज्ञा
नविषयाजनकत्वप्रसक्तेरभावेनसामान्यधर्मप्रकारकज्ञानस्यस्वतंत्रहेतुतायावश्यकत्वात् ननहिसामान्यधर्मव्याप्यधर्मप्रका
रकज्ञानत्वावच्छिन्नेष्टसाधनताज्ञानं स्वरूपसंबंधेनकार्यत्वप्रकारकतानियमं नवास्वरूपसंबंधेनकार्यत्वप्रकारकज्ञानाभावे
तद्व्याप्यधर्मप्रकारकज्ञानेच्छासंभवः अतस्वतंत्रहेतुत्वैवसामान्यधर्मप्रकारकज्ञानस्यावश्यकइतिनकिंचिदेतत् तत्पर्याप्तीति
अवच्छेदकत्वपर्याप्तीत्यर्थः कार्यत्वघटकेति अभावत्वप्रतियोगित्वाधेयत्वादित्यर्थः एतल्लाभायेति अवच्छेदकत्वपर्याप्तिला
भायेत्यर्थः अवच्छेदकतायां प्रकारतासंबंधावच्छिन्नस्यव्यावृत्तिं दर्शयति प्रकारकेति इष्टसाधनत्वादिव्याप्तिवारणाय जिज्ञासा
निष्ठकारणतायां धर्मविशेषावच्छिन्नत्वं निवेशितं मतं तद्रूपयितुमुपन्यस्यति यत्त्विति तादृशजिज्ञासात्वेति अनंतराभिधाना
प्रयोजकजिज्ञासात्वेत्यर्थः उपायेच्छात्वस्येति मुखान्यविषयकेच्छात्वरूपस्येत्यर्थः घटेच्छादिति किंचिद्धर्मव्याप्यत्वाप्रकारकेच्छा

२१ 21
घटत्वप्रकारकेच्छादिसाधारणेनेत्यर्थः तादृशजिज्ञासात्वेति अनंतराभिधानप्रयोजकजिज्ञासात्वव्याप्यत्वाभावादि
त्यर्थः मतंदूषयति कार्यत्वावांतरेति उक्तावदयंप्रष्टव्यः अनंतराभिधानप्रयोजकजिज्ञासात्वव्याप्यधर्मः लक्षणसमन्व
यऔपाधिकः को वा धर्मो भवतोभिमतः किं कार्यत्वव्याप्यधर्मप्रकारकज्ञानेच्छात्वं किंवा तत्तदिच्छाकथंतद्व्यक्तित्वादिश्रा
याः कार्यतावांतरेतिजिज्ञासात्वाव्याप्यत्वादिति उपेक्षादिनाक्वचिदानंतर्याभिधानाभावेपितादृशजिज्ञासायाःसंभवादित्या
शयः द्वितीयेत्वाह तत्तद्व्यक्तित्वावच्छिन्नेतिजिज्ञासानिष्ठतद्व्यक्तित्वस्यानंतर्याभिधानप्रयोजकजिज्ञासात्वव्याप्यत्वसं
भवेपितदवच्छिन्नकार्यतानिरूपिताकारणतायां तद्व्यक्तित्वस्यैवावच्छेदकतया कार्यत्वस्य प्रकारितासंबंधेनावच्छेदक
त्वाभावादसंभवस्यादितिभावः इष्टसाधनत्वमितिज्ञाननिष्ठमिष्टसाधनत्वमित्यर्थः संगतिरेवेतितस्यापि इष्टादिनि
रूपितसंगतित्वरूपत्वेन संगतिसामान्यलक्षणेतस्यापिलक्ष्यत्वमित्यर्थः अतएवाह तत्रातिव्याप्तिरिति तन्नुच्छमिति सं राम०
वेधविशेषानुपरक्तस्य सामान्यतउपजीवकत्वादिसंगतिसामान्यस्यानंतराभिधानानुपपादकत्वेन तल्लक्षणस्य गच्छेते २१

नवसरपराहतत्वात्संबंधिविशेषोपरक्तविशेषसंगतिलक्षणापरमेवेत्यानंतर्याभिधानेस्यादिकंवाच्यं एतस्य च लक्षणस्य
प्रकृतसंबंधघ्नउपक्तेरिष्टसाधनतादावतिव्याप्तेः संगतिसामान्यलक्षणताभिप्रायेणापरिहारः अतीवाल्पबुध्यता विला
स इति तुच्छपदेनसूचयति प्रत्यक्षानुमानयोरिति तदुभयोपरक्तकार्यकार्यकारणाभाव इत्यर्थः तयोः संगतिरिति तदुभ
यसंगतिलक्षणस्य लक्ष्यतावच्छेदकमित्यर्थः नत्विष्टसाधनत्वमिति निरनुज्ञानादिकतयैव इष्टसाधनत्वं लक्ष्यमित्यर्थः पू
र्वोक्तलक्ष्यतावच्छेदकानाक्रांतत्वादिसाशयः वदनंतरमिति तदुभयैकतरानंतरापराभिधानप्रयोजकजिज्ञासाजनकता
नविषयकत्वं तदुभयसंगतित्वावच्छिन्नस्य लक्षणमित्यर्थः एवं च तदुभयसंगतित्वरूपलक्ष्यतावच्छेदकानाक्रांतेज्ञाननि
ष्टेष्टसाधनत्वे प्रत्यक्षानुमानोभयसंगतिलक्षणस्य तदुभयैकतरानंतरापराभिधानप्रयोजकजिज्ञासाजनकज्ञानविष
यत्वरूपस्यातिव्याप्तिपरिहारायैवेत्याशयः मतांतरमाह यद्धर्मव्याप्येति जिज्ञासाजनकज्ञानविषयत्वं न पर्याप्तं तं किंतु जि
ज्ञासाजनकइष्टसाधनताज्ञानीयप्रकारितानिष्ठविशेष्यतावच्छेदकतानिरूपितनिरूपितत्वसंबंधावच्छिन्नावच्छेदकता

२२ निरूपितस्वरूपसंबंधावच्छिन्नावच्छेदकतानिरूपितव्याप्तिनिष्ठविशेष्यतायानिरूपितत्वसंबंधेनावच्छेदकत्वस्यैवसत्त्वे
22 नोपजीवकत्वेसत्वेनसएवसंगतिः अतएवेतिइष्टसाधनताज्ञानमादायकार्यताद्रौलक्षणसमन्वयादेवेत्यर्थः जन
कताभावेपीतिस्वातंत्र्येणजनकताभावेपीत्यर्थः नचेष्टसाधनत्वइतिइष्टसाधनत्वस्यतादृशजनकज्ञानविषयत्वेपि
जनकज्ञानीयविशेष्यतावच्छेदकताविशेषणविरहादित्याशयः केचिदित्यस्वरसः इष्टसाधनताज्ञानस्यविशेषणतयासा
मान्यधर्मप्रकारकत्वेपिसामान्यधर्मताप्रयोजकस्वरूपादिसंबंधेनतत्प्रकारकताभावात्तु नतन्मात्रेणविशेषधर्मप्रकार
कजिज्ञासानिर्वाहः एवंजनकज्ञानीयइष्टसाधनत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतानिवेशोजिज्ञासीयविशेष्यता
वच्छेदकताविशेषनिवेशानिवेशास्यैवप्रत्युवर्चत्वेनजनकतानेसादिकंव्यर्थमेवस्यादिति अभिन्नानंतरमितिकोयटइतिज्ञा
सायाअनंतरणाभिधानप्रयोजकत्वलाभायघटत्वेतिव्याप्तिरिति घटत्वज्ञानस्यैवसामान्यज्ञानविधयाविशेषजिज्ञासा रा.म.
जनकत्वादितिभावः नन्वत्राव्याप्तिस्सामान्यलक्षणस्यविशेषलक्षणस्यवाआद्येआनंतर्याभिधानादेस्सामान्यल २२

क्षणापरत्वे निखिलविशेषणवैयर्थ्यं धर्मत्वमात्रस्यैव सामान्यलक्षणत्वसंभवात् घटत्वादेरिव तस्य मानाशरीत्या धर्ममा
त्रस्यैव संगतित्वसंभवात् विशेषणलक्षणस्य चेत्त्वभिप्रायः किंचिदभिज्ञानेन तरस्याभिधानस्य स्वाभिधानानंतरस्य भिन्नाभिधा
नस्य वा प्रयोजिकतया जिज्ञासाजनकेत्यादिरूपस्य तद्घटाभिधानानंतरघटाभिधानप्रयोजकजिज्ञासाजनकज्ञानवि
षयघटत्वादावतिव्याप्त्यप्रसक्तेः न च घटात्तितामारायाभिधानभेदनिर्वाहः तथापि पुरुषार्थोपयोगिनोर्थस्याभिधानानंतरं
अन्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयधर्मस्य तदर्थसंगतित्वमिति घटत्वादेः पुरुषार्थोपयोग्यर्थाभिधानानंतरा
भिधानप्रयोजकजिज्ञासाजनकज्ञानाजनकज्ञानविषयत्वरूपसंगतित्वस्य सर्वथैवाप्रसक्तेरिति चेत्तत्संप्रत्ययस्यानंतरेत्यादि
प्रसक्तसंगतिलक्षणस्य घटत्वादावतिव्याप्तिपरोधयंधः तत्र च प्रसक्तादेः पुरुषार्थोपयोगित्वेन तदनंतरं घटाभिधानप्रयोज
कजिज्ञासाजनकज्ञानविषयत्वस्य प्रसक्तस्य संगतिलक्षणस्य घटत्वादावर्थतत्त्वादिति एवं सति यथा सिद्धांतग्रंथालग्नकतान
भवति तथा तत्रैव समर्थयिष्यते ननु तादृशज्ञानविषयत्वे सति स्वसंबंधिकत्वमेव लक्षणं वाच्यं अतो न घटत्वादावतिव्याप्तिः

२३ अतआह एवमिति सिद्धांतमाह अत्र ब्रूम इति संगतिरेवेति इदं च संगतिलक्षणे पूर्वाभिहितस्य पुरुषार्थोपयोगित्वाविवक्षाभि
23 धेयमेदसचाविवक्षामभ्युपेत्यांकिंतत्कालावदनेति तत्कालावच्छिन्नविषयतयाऽनुकूलजिज्ञासाविशिष्टेत्यर्थः एतच्च प्र
कृतानुकूलत्वस्य विशेषणं जिज्ञासाभाववद्दशायामनुकूलतादेः संगतित्वाभावसूचनाय तदानीमपि संगतित्वव्यवहारे नि
यतमुपोद्घातलक्षणाघटकः किंतु स्वरूपकथनमात्रं वक्ष्यतसंगतित्वलाभायेति बोध्यं प्रकृतं चेतियन्निरूपितोपोद्घातोपत्र
विवक्षितः तदेव तत्र प्रकृतपदेनोपादेयमित्यर्थः घटकत्वमिति विशेषणादिविधय इत्यर्थः उपपादकत्वमिति तद्घटकय
त्किंचिदर्थोपपादकत्वमित्यर्थः ज्ञापकत्वमिति तद्घटकयत्किंचिद्ज्ञापकत्वमित्यर्थः त्रयाणामपि एकत्वे व्याप्तिविशिष्टप
क्षधर्मताज्ञानजन्यं ज्ञानं इत्येव विशिष्टविशेषणानिरूपितानुमितिः प्रकृतार्थ एव व्याप्तिसामान्यलक्षणापरामर्शहेतुत्व
व्यवस्थापनातिक्रमणोदाहरणानि दर्शयति घटकत्वं यथेत्यादिव्याप्तिपदवाच्यत्वेनेति तथा च घटत्वरूपोपोद्घातेनानु राम०
मितत्वेनं तं व्याप्तिनिरूपणमित्यर्थः उत्पत्तिप्रयोजकत्वलक्षणमुपपादकत्वमुदाहरति एवमिंद्रियेति नतु पक्षव्यापकमि २३

तिपर्वतीयधूमविशेष्यकव्याप्तिप्रकारकज्ञानजनकपर्वतीयधूमोपस्थितजनकं विनेत्यर्थः तथा च विशिष्टज्ञानोपपादक
त्वरूपोपोद्घातेन सामान्यलक्षणानिरूपितामित्यर्थः ज्ञापकत्वमुदाहरति एवं विशिष्टज्ञानस्येति किं ज्ञापकमिति कायुक्ति
रित्यर्थः तथा च ज्ञापकत्वलक्षणोपोद्घातेन हेतुत्वव्यवस्थापकयुक्तिनिरूपितामित्यर्थः घटत्वादेरुपोद्घातत्वं उपसं
हरति प्रकृते चेति चिन्ताकालीनत्वस्येति जिज्ञासाकालीनत्वस्येत्यर्थः इदं च जिज्ञासाजनकज्ञानविषयत्वरूपसंगतित्वलाभा
येत्यादिग्रागुन्नग्रायं घटकत्व इति घटादिनिष्ठघटकतावच्छेदकरूपात्मके घटत्व इत्यर्थः अनुपेक्षणीयत्वज्ञानेनेति अनुपे
क्षणीयतावच्छेदकाधेयत्वज्ञानेनेत्यर्थः जिज्ञासोदयादिति संगतित्वसूचनायेदं आधेयत्वादिवत् घटपदवाच्यत्वादिकमपि
प्रसंगमध्येवांतर्भवति प्रसंगलक्षणे अनुपेक्षणीयत्वाभावरूपत्वे आधेयत्वादेरपि प्रसंगतानुपपत्तिः अनुपेक्षणीयता
वच्छेदकधर्मरूपत्वे घटपदवाच्यत्वादेरपि प्रसंगत्वमेवोचितमित्याशयः तदेव ध्वनयन्नाह अनुपेक्षणीयत्वे हीति उपेक्षान
र्हतावच्छेदकेति आधेयत्वादेः प्रसंगत्वानुरोधादित्यर्थः उक्तरूपेणैवेति उपेक्षानर्हतावच्छेदकत्वरूपेणेत्यर्थः तदनुगमादिति

२४ 24 तेषां घटपदवाच्यत्वप्रमेयत्वादिधर्माणां उक्तलक्षणोनकोटिकाद्यादित्यर्थः आकुरितस्वरसः प्रसंगलक्षणो उपोद्घाता
दिभिन्नत्वे सति एकनिरूपणानन्तरमन्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयधर्मत्वमेव निवेशाद्घटपदवा
च्यत्वादेरुपोद्घातरूपतापात्तप्रसंगत्वसंभवइतिव्यक्तिमविष्यति चेदमुपरिष्टात्तत्र प्रसंगोपोद्घातः हेतुतावसरस्तथा नि
र्वाहकैककार्यत्वमेवोद्रासंगतिरिष्यतइति प्राचीनकारिकोक्तप्रसंगादिसंगतीविवरीतुमाहतत्रस्मृतीतिस्वरूपसन्निति श
रीरऽनुपेक्षणीयं किमितिजिज्ञासायोग्यानुपेक्षणीयत्वज्ञानमात्रमेवापेक्षितत्वादित्याशयः स्मृतिरितिनिरूप्यतावच्छेदक
धर्मप्रकारकास्मृतिरित्यर्थः स्मृतएवाह स्वयं स्मृतायामितिशिष्यस्यनिरूप्यतावच्छेदकधर्मप्रकारकस्मरणोप[illegible]मेतत्प्र
कारकजिज्ञासायाएवानुदयप्रसंगादित्यर्थः स्वीयानुपेक्षणीयत्वेत्वस्याविशेषदर्शित्वेनस्वानुपेक्षणीयत्वज्ञानस्यमप्रमह राम० २४
पस्यापि संभवेन प्रमात्वानवधारणात्तस्य पुरुषार्थोपयोग्यनन्तराभिधानप्रयोजकजिज्ञासासंभवाच्चेदित्यर्थः श्रोतुरेवेति अ
त्रस्मृतिः सामान्यधर्मप्रकारिकास्याश्रोतुरेवस्यादित्यर्थः अस्मिन्नुप्रष्टइति एतन्मतेऽनुपेक्षणीयतावच्छेदकरूपमेव प्रसंगः

परंतु तद्धर्मावच्छेदेन वक्त्रा उपेक्षणीयत्वग्रहविशिष्टतद्धर्मप्रकारकज्ञानस्य जिज्ञासाजनकत्वमिति विशेषः अत एवाह इति
प्रतिसंधायेति प्रकृतसिध्यनुकूले ति प्रकृतार्थबुबोधयिषाकालावच्छिन्नप्रकृतानुकूलत्वमित्यर्थः उदासीनविशिष्टार्थब
टकः एकदेशावगाणापावच्छिन्नांतं तदेव दर्शयति चिंता चेति स्वरूपसन्निति वक्तृबुबोधयिषाभावकालीनस्य प्रकृतानुकूलत्वज्ञा
नस्यानंतराभिधानप्रयोजकजिज्ञासाजनकत्वस्यैवानिर्वाहादिति भावः हेतुतायास्फुटत्वार्थोपरिस्यज्ञावसरसंवादितिं लक्षय
तिप्रतिबंधकीभूतेति अत्र प्रतिबंधकीभूतत्वं निष्प्रयोजकीभूतजिज्ञासाभावव्याप्यत्वेन द्रष्टव्यं जिज्ञासायां सुगमजिज्ञा
सायाः प्रतिबंधकत्वं वक्ष्यमाणरीत्या बोध्यं। तदेतदवसरसंगतिमुपमाने लक्षणमुखेन ग्राहयति तथानुमान इति जिज्ञासितार्थस्ये
तिप्रथमजिज्ञासाविषयीभूतार्थस्येत्यर्थः सिद्धत्वमिति ज्ञातत्वमित्यर्थः अनुमाननिष्ठज्ञाततत्त्वस्य अनुमान एव सत्त्वात् उप
मानसंगतित्वानुपपत्तिरिति केचिदित्यस्वारसः पूर्वोक्त एवेति जिज्ञासितसिद्धत्वप्रतिबंधकजिज्ञासानिवृत्तिलाभात् तादृशनिवृत्त्य
वच्छिन्नेवक्तृव्याप्तत्वमेव संगतिः पर्यवस्यतीत्यर्थः तज्ज्ञानमेव दर्शयति भवति हीति इदं ज्ञातमिति अनेन जिज्ञासानिवृत्तिरूपलक्ष्य

२५ तेएककार्यनिर्वाहकत्वमितितद्भिन्नत्वेसतितन्निर्वाहकार्यनिर्वाहकत्वमित्यर्थः हेतुताकार्यकारणयोःसंगतिः इदंतुकार
25 णयोरेवमिथःसंगतिरितिभेदःकारणतत्वावच्छेदकेतिएककार्यकारणत्वसंगतिप्रत्यक्षकरणनिरूपणानंतरंतत्सन्निक
र्षनिरूपणेवोध्याहेतुतावच्छेदकत्वरूपनिर्वाहकत्वस्यउदाहरणंदर्शयति।तथाव्याप्तीतिसामान्यतइतिव्याप्तिभिन्नत्वे
सतिव्याप्तिनिर्वाहाकार्यनिर्वाहकत्वज्ञानेनेत्यर्थः अनुमितिलक्षणेतिपक्षधर्मतयाव्याप्यस्यह अतिलक्षणेककार्यानुकू
लेयज्ञानेत्यर्थः एकस्यकार्यंनेतित्वभिन्नत्वेसतिस्वप्रयोजकप्रयोज्यत्वमित्यर्थः निर्मूलीयरूपणानुसारेणाद्वितीयप्रयोज्य
तांप्रथममुदाहरतिपथेम्परशंकोरितितज्जन्यज्ञानेतिक्षित्यादिकंसकर्तृकंकार्यत्वात्करवह्निसंयोगः अदृष्टातीन्द्रिय
धर्मसमवायिजनकत्वादित्यनुमानजन्यानुमितिविषयत्वलक्षणेत्यर्थः आद्यांप्रयोज्यतामुदाहरतिनैय्यायिकेनेति।ईश्व
रसिध्यपवर्गयोरितिईश्वरसिद्धेरनुमानजन्यत्वंप्रागेववर्णितंअपवर्गस्यानुमानजन्यत्वंमानजन्यतात्पादायवोध्यं।एक एम०
कार्यत्वज्ञानेति।अपवर्गस्यईश्वरसिध्यासहएकनिरूपितकार्यज्ञानइत्यर्थः सामान्यलक्षणेतिआनंतर्याभिधानेत्यादित्यर्थः २५

स्वयंनिर्वाहकत्वंएककार्यनिर्वाहकत्वरूपंतयाव्याख्यातंउपपादकत्वंतत्सङ्गत्युपपादकत्वादिरूपंतदितियेचांतिता
न्निरस्यतुमाहयत्वितिनज्ञापकत्वमितितत्त्वानजनकज्ञानविषयत्वंतत्ज्ञानप्रामाण्यनिश्चयाभिधायकज्ञानविष
यत्वंवाआद्यंवह्न्यादिकंप्रतिधूमस्यद्वितीयधूमादिकंप्रतिवह्नेर्व्याप्यकाग्रहेव्याप्यवत्ताज्ञानेप्रामाण्यानिश्चयादितिविभि
न्नतात्पर्यकइतिचक्षुरादिनिरूपणानंतरंचक्षुर्ध्वंसादिनिरूपणाद्इत्यर्थः एकवाक्यतापन्नत्वमितिएवंपरंपरापाग्रंथेसं
गतिव्यवहारेविशेषणत्वंबोध्यं। अर्थेनतद्व्यवहारेतुकथंविदेकार्थाभियोगित्वमात्रंतथेतिबोध्यं। अतिप्रसक्तत्वादितिनज्ञा
नमात्रस्यैवज्ञानत्वेनइच्छास्वरूपयोग्यत्वात्। तद्विषयधर्ममात्रेतिव्याप्तिः। सर्वत्रइति। याद्दशकार्यत्वादिव्यक्तिज्ञाननस्मन
जिज्ञासोपधानंतत्राव्याप्तिरित्यर्थः जायतेत्यादिग्रंथेनदीधितौकार्यत्वादौसंगतिलक्षणसंगमनंकार्यज्ञानेकारणता
नवगाहिप्रदर्शनेनविरोधाद्इतिकार्यंसकारणमित्यादिद्वयोरेवेतिति। कार्यत्वकारणत्वयोर्द्वयोरपीत्यर्थः ननुउभयो
स्संगतित्वप्रदर्शनेनकापकृतसिद्धिरित्यतआहतथाचेति। उभयोस्संगतित्वेसतीत्यर्थः असंगतीति। तथासंगतेचानंतराभि

२६ 26 क्षानव्याप्यत्वाभावलाभायैवतुभयोः संगतित्वप्रदर्शनमित्यर्थः संगतेरिति कारणताया इव कार्यताया अपि पूर्वाभिहितोप्र
त्यक्षादिसाधारण्येपि न क्षतिर्नोपजीवकत्वादिपंचम्यनुपपत्तिरिति मूलाशय इत्याशयः ननु व्याप्यत्वाभावे उपजीवकत्वादि
पंचम्याः कथं नानुपपत्तिः ज्ञापकत्वस्यैव तदर्थत्वात् अत आह एवं चेति न हेतुतामात्रमिति न धूमाद्वह्निमानित्यादिवत् न ज्ञाप
कतामात्रं पंचम्यर्थः कस्तर्हि प्रकृते पंचम्यर्थ इत्यत आह ज्ञानजन्येति प्रयोज्यतायाः साक्षात्परंपरासाधारण्यात्प्रयोज्यतात्वे
न शक्त्यावच्छिन्नाऽजन्यजिज्ञासाप्रयोज्यतात्वादिना प्रकृतमपंचम्याप्रयोज्यताविशेषप्रतिपाद्यते तथा प्रतिपादनं च एकवा
क्यताव्याप्यतावच्छेदकस्य संगतित्वस्य उपजीवकत्वादेर्ग्रहार्थोऽतः प्रत्यक्षोपजीवकं अनुमानं निरूप्यत इत्येतावदेव सुवि
तं। किं पंचमीप्रयोगक्लेशेनेति शंकापानवकाश इत्याशयः। अत्र वदंति। संगतिप्रदर्शनस्य एकवाक्यतादिप्रतिपत्तिद्वारा प्रवृ
त्तिसामग्रीसंपत्त्यर्थत्वात् समवसंग इत्यादिकारिकोक्तोपजीवकत्वादिसंगतेः कथं प्रवृत्तिसामग्रीसंपादकत्वं न ह्युपजीवकोप प्रम०
जीव्यकाभावार्थधर्मस्य परंपरयापि ग्रंथगतैकवाक्यताव्याप्तिः संभवति समूलिकादीनां पृथिवीजन्यत्वेपि तत्प्रतिपादका २६

पुर्वैदादौ पृथिवीनिरूपणे वक्तव्यत्वस्य घटज्ञानादिस्वरूपाणामाकाशादिजन्यत्वेऽपि गंधर्वशास्त्रे आकाशादिनिरूपणे एकवाक्यत्व
स्य च सर्वजनविरोधानंगीकारात् अथ शास्त्रसंगतिमत्वे सतीति विशेषणीयं शास्त्रसंगतिश्च एकशास्त्रार्थावयवत्वं तदव
यवकशास्त्रार्थावयवत्वं तत्र तन्निरूपितशास्त्रसंगतिरितियावत् प्रमाणाचतुष्टयस्य शास्त्रार्थत्वे प्रत्यक्षावयवकशास्त्रार्थाव
यवत्वस्यानुमानादौ सुलभत्वात्प्रत्यक्षनिरूपितशास्त्रसंगतिमत्वे सति प्रत्यक्षोपजीवकत्वस्य विशिष्टहेतोऽनुमानादौ नि
र्वाहः। समूलिकादिषु उपजीवकत्वादिविषयसंगतिसत्वेऽपि तद्रूपेण पृथिव्यादिनिरूपितशास्त्रसंगतेरभावेन विशिष्टहेत्व
सत्वात् न व्यभिचारः एवं घटज्ञानादिष्वपीति चेत् न तथा सति शास्त्रसंगतिमात्रस्यैव ताद्रूप्येण एकवाक्यतागमकत्वसत्वे उप
जीवकत्वादिविशेष्यभागनिवेशवैयर्थ्यं एवमुपजीवकत्वादिसंगतेर्दर्शितसंगतिलक्षणस्याप्यनुपपत्तिः न हि कार्यत्वादौ
उक्तजिज्ञासाजनकज्ञानविषयत्वसंभवः कार्यत्वादिरूपसामान्यधर्मज्ञानस्यैव नियमतो दुर्लभत्वात् न हि प्रत्यक्षग्रंथेका
रणत्वेन तन्निरूपणायेन पूर्वाभिधानजन्यं कार्यत्वज्ञाने विशेषजिज्ञासां जनयेत्सूर्वाभिधानातिरिक्तोदासीनवाक्योपज्ञातका

२७ 27 यत्वादिज्ञानस्यापिजिज्ञासाजनकत्वेप्रतियोग्यनियोगिभावादिस्फुरिवाकांक्षोत्तरेणसंभवेनतद्ज्ञानस्यापिजिज्ञासाजनक
त्वापत्तौचक्षुरादिध्वंसादिनिष्ठचक्षुराद्युपजीवकत्वादेरपिचक्षुरादिसंगतित्वापत्तेर्दुर्वारत्वात्तस्मात्पूर्वाभिधानजन्यज्ञानमे
वलक्षणघटकमवश्यमुपेयंचकार्यत्वादेस्तादृशंज्ञानंसंभवतीयेनसंगत्वमुपपाद्येततस्माच्छास्त्रसंगतेरेवएकवाक्यतात्मा
पत्त्यमनंतराभिधानेस्यादिलक्षणाक्रांतत्वंचसंभवतीतिशास्त्रसंगतिरेवात्रप्रदर्शयितुमुचिताअनंतराभिधानेस्यादिसंग
मयितुंतत्प्रकारजिज्ञासेवचदर्शयितुमुचितातथाहिएकशास्त्रावयवत्वरूपप्रत्यक्षानुमानयोःशास्त्रसंगतिःप्रत्यक्षाभि
धानेप्रत्यक्षादेःप्रथमप्रमाणत्वरूपगुणाभिधानेतादृशाभिधानजन्यस्यद्वितीयप्रमाणत्वादिज्ञानस्यप्रत्यक्षोत्सर्गिकोत्साकिं
तत्द्वितीयंप्रमाणमितिजिज्ञासायाजननानुमानादेरनंतराभिधानमितिद्वितीयप्रमाणत्वादिरूपप्रकृतिशास्त्रार्थावय
चत्वेदर्शितसंगतिलक्षणनिर्वाहःतादृशशास्त्रार्थावयवत्वरूपसंगतिप्रदर्शनस्यएकवाक्यताअव्यभिचारित्वेनप्रवृत्ति राम
सामग्रीसंपादकत्वनिर्वाहस्येतितत्रैवानंतराभिधानेस्यादिलक्षणसंगमनुदर्शयितुमुचितंनतुजायतेतेत्यादिनाकारणत २७

कार्यत्वादौ न ज्ञानस्य पूर्वाभिधानानुत्थापितत्वेन जिज्ञासाजनकत्वस्यैव दुर्घटत्वात् अभिचारेण एकवाक्यत्वानुमापकतया
प्रवृत्तिसामग्रीसंपादकत्वाभावाच्च अत एवातिरिक्तस्य तत्र संगतिस्वीकारे कामेनाप्यास्थेया अन्यथा एकवाक्यताप्रतिपत्ते
रेव दुर्घटतया प्रवृत्तेरिव वेदोल्लम्भापातात् पूर्वापरनिरूपणयोः एकस्मात्तत्र संबंधाग्रे चतुर्थप्रतिपत्तिलक्षणः एकफलसंबंध
ग्रंथस्यापि अनुमानादौ दुरूपपादत्वात् अनुमाननिरूपणमात्रस्य प्रमाणचतुष्टयप्रतिपत्तौ अपर्याप्तत्वेन शास्त्रद्वारे सौ
व फलसंबंधस्याग्रात्यत्वात् एवं विषयसंगतेरेकवाक्यतागमकत्वे प्रत्यक्षे तादृशसंगतेरभावेन एकवाक्यताग्रे प्रथमम
धीतानुमानग्रंथस्य प्रसक्तस्याग्रे धाभ्यापनानुपपत्तिश्च अस्माकं तु तत्र अप्यनुमानावपत्रकशास्त्रार्थावयवत्वतयानुमाननिरू
पितशास्त्रसंगतेः प्रत्यक्षादौ ग्राहसंभवेन एकवाक्यताप्रतिपत्तिसंभवेन प्रवृत्तिसामग्र्यवच्छेदादिति वस्तुतस्तु अतिरिक्त
शास्त्रसंगत्यनंगीकारे अनंतराभिधानस्यैवानुपपत्तिः आकांक्षाक्रमेणैवाभिधानमिति नियमात् अनुमानाभिधाने शिष्य
जिज्ञासावश्यंवाच्या सा च किमपरं प्रमाणमित्याकारैव भवितुमर्हति न तु मस्योपजीवकमित्याकारोपजीव्यकत्वेन प्रत्यक्षनि

रूपत्वेन तादृशजिज्ञासोत्थानस्यैवासंभवात्तन्नेत्युक्तजिज्ञासाधारानंतराभिधानप्रयोजकत्वमभ्युपेतेन तदा तद्विषयीभूतस्य
शास्त्रार्थैकतावच्छेदकस्य द्वितीयप्रमाणत्वादेः संगतित्वमपि दुर्वारं यदि नानुमन्यते तदा जिज्ञासांतरस्याभावात् अनंतरा
भिधानस्यैवानुपपत्तिरिति तस्माच्छास्त्रसंगतेरेव एकवाक्यताग्राहकत्वं उक्तलक्षणविषयत्वं च न तूपजीवकत्वादिरूपविषय
संगतेरिति स्थितं तत्र हि प्रत्यक्षोपजीवकत्वादिति मूले तदुपदर्शनवैयर्थ्यं एकवाक्यताप्रतिपत्तौ तदनुपयोगात् तत्प्रतिपाद
कशास्त्रसंगतेः प्रदर्शना - न्यूनता चेति चेत् सत्यं उपजीवकत्वप्रदर्शनस्यैकवाक्यताप्रतिपत्त्यर्थत्वाभावेपि कुतोस्यानंत
र्यमिति जिज्ञासितानंतर्यगमकधर्मप्रदर्शनार्थत्वात् एकवाक्यताप्रतिपत्त्यभाव इव प्रत्यक्षानुमाननिरूपणयोः आनंतर्यगम
कस्य विषयसंगतिरूपस्य विषयपौर्वापर्यस्याग्रहेपि उन्मत्तप्रलपितत्वादिशंकामूलकस्य प्रवृत्तिविलंबस्य दुर्वारत्वात् अनुमाना
देरुद्देशवाक्यावगतप्रमाणचतुष्टैकदेशत्वलक्षणशास्त्रसंगतेः स्मरणसौलभ्याभिप्रायेणानुमानपदस्य तन्नामकद्विती
यप्रमाणपरतया वा एकवाक्यताप्रतिपत्तेः सौलभ्यमित्याशयेन मूले शास्त्रसंगतेः प्रदर्शनोपपत्तेरिति अत्रायं विभागः उभय

रूपैव संगतिः । व्यर्थं प्रदर्शनीयायाः शास्त्रसंगतिर्विषयसंगतिश्चेति तत्र प्राप्तसंगतेरेव वाक्यताप्रतिपत्तिद्वारा प्रवृत्तिसा
मग्री पूरकत्वं फलविषयसंगतेस्तु अविनिगमशंकानिवृत्तिद्वारा प्रवृत्तिविरोधि उन्मत्तप्रलपितत्वादिशंकानिरासः इति भे
दः अत एवानुमाननिरूपणानंतरं व्याप्तिजिज्ञासानुरोधेन कृतेपि व्याप्तेस्तन्निरूपणे शास्त्रसंगतिसत्वेप्यसंगतिर्व्यवहा
रः विषयसंगतिविरहात् ननु तथापि उपजीवकत्वादेः कथं संगतित्वं तज्जिज्ञासायाः अनंतराभिधानप्रयोजकत्वस्य प्रा
गेव खंडनात् अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वस्यैव तल्लक्षणत्वादिति चेत् एतस्य शास्त्रसंगतिल
क्षणतया विषयसंगतेर्लक्षणांतरस्यैव वाच्यत्वात् संगतिपदस्य नानार्थत्वात् तथानंतराभिधानगमकजिज्ञासानिवर्त
कज्ञानविषयत्वमेव विषयसंगतित्वं कुतोऽनुमानाभिधानस्यानंतर्यमितस्याभिधानानंतर्यगमकजिज्ञासायाः निरूपणानंत
र्ये प्रयोजकस्य विषयपौर्वापर्यस्य प्रदर्शन एव निवृत्तिरिति तादृशगमकजिज्ञासानिवर्तकज्ञानविषयत्वं पौर्वापर्यादिलक्ष
णविषयसंगतावस्त्येवेति लक्षणसमन्वयः न चोपजीवकत्वादेरानंतर्यव्याप्यत्वमिति कथं तच्चित्कार्यनिरूप्यापिकार

२९
29

निरूपणादितिवाच्यं केवलस्याख्यातित्वेपि शाब्दान्येन सामान्यसंगतिविशिष्टत्वेनाप्यतापासंगतत्वात् अन्यथा मित्यादौ अ
नुमानोपजीवकतायारूपसर्जनतायाश्च सामान्यसंगतेश्च सत्वेपि प्रमाणपंचाभावेन अभिचाराभावात् अयं च तादृशसंग
तिमतो देव प्रत्यक्षानुमानाद्योः स्फुटत्वेष्य जिज्ञासानुरोधेन विपरीताभिधानं तन्नयात्त्रीयमितिशिष्यादेः तदध्ययनप्र
वृत्तावितात्त्वीकामिमताभिधानस्य स्थले उक्तोपजीवकत्वादेरानंतर्यस्यापित्त्वाहिनैव संगतेरानंतर्याभिधानव्यापकत्वप्र
वादत्वशास्त्रसंगतिपरः विषयसंगतेः क्वचित् अप्रहतत्वादिरूपायापि निरूपणायौर्वापर्यनियामकतयाउपजीवकत्वा
दिरूपविषयसंगतीनां कासामपि अनंतराभिधानव्यापकत्वासंभवादितिविस्तरस्तु वज्रटंके बोध्यः लाघवायेनेति संगतिप्र
दर्शनप्रयोजकस्यकुतोस्यानुमानानानंतर्यमीतिजिज्ञासानंतरस्यानुमानापेक्षयाव ह्लायसंमतत्वात् इतिशब्दांतरस्य च
कल्पनालाघवायेत्यर्थः एतदेवशंकोत्तराभ्यां विषयतियघयीतिताहशाब्देनेति अनुमानस्य व ह्लादिसंमतत्वादिशब्देनैवे एम·
त्यर्थः नशब्दलाघवमितिइदंचानुमानग्रंथेन्च वादिसंमतत्वादितिवाच्यमित्यभिप्रायेणायक्तु तदत्राप्याकांक्षानिवृत्त्येता २९

दृश्यशब्दप्रयोगस्यावश्यकत्वात् अत्रौपमानिसंगतिप्रदर्शने हि सादृश्यशब्दाप्रयोगलाघवमावश्यकमेवेति बोध्यं प्रकर-
णलाघवायेति उपमानग्रंथे संगतिप्रदर्शनप्रयोजकाकांक्षान्तरकल्पनलाघवायेत्यर्थः प्रकरणशब्दं विवृणोति प्रक-
रणं चेति संगतिप्रदर्शनेति विषयसंगतिप्रदर्शनप्रयोजकेत्यर्थः आकांक्षान्तरकल्पनलाघवमुपपादयति। प्रसक्ता-
नंतरमित्यादि उपमानात्प्रागिति तथा चानुमानस्योपमानपूर्वत्वनियामकजिज्ञासाया आवश्यकतया तज्जिज्ञासयैवानुमाने
उपमाने च संगतिप्रदर्शनोपपत्तौ जिज्ञासान्तराश्रयेण उपमानग्रंथे संगतिप्रदर्शने कल्पनागौरवमित्यर्थः न संगतिरिति
किमन्यद्दृष्टव्यमिति वक्तव्यत्वज्ञानादेव जिज्ञासोदये न वृद्धादिसम्मतत्वे तादृशजिज्ञासाजनकज्ञानविषयत्वस्य दु-
रुपपादत्वादित्यर्थः सुप्रसिद्धतयेत्यादीति तथा च वृद्धादिसंमतत्वस्य न साक्षात्संगतित्वं किंतु सुप्रसिद्धत्वनीरसनीयत्व-
वादिप्रतिपत्तिकत्वमुपतिपदत्वादिबोधद्वारा प्राथमिकजिज्ञासाविषयत्वबोधनेनोपमानजिज्ञासानुत्पत्तिद्वारा प्रवृ-
त्तिजिज्ञासया उपमाननिरूपणप्रतिबंधकत्वलाभेन तन्निवृत्तिकालावच्छिन्नं वक्तव्यत्वमेव उपमानसंगतित्वेन वृद्धादि

संमतित्यादिग्रन्थेन प्रदर्शित इति भावः संप्रसिद्ध लोके ह्युपयोगं दर्शयति सामान्यधर्मेति जिज्ञासेति प्राथमिकानुमानजि ३० 30
ज्ञासा जिज्ञासस्येत्यर्थः सामान्यधर्मप्रकारकज्ञानस्येव ज्ञानेव ह्नाद्यासाध्यत्वाभावज्ञानस्यापि ज्ञानधर्मकेच्छायां हेतु
त्वयास्तु प्रतिपदत्वं दीधितयाउपात्तं तत्रश्रमाभावोपपादकतयो निरसनीया स्यवादिसादिग्रंथं भा चहेतु प्रतिपदतये
त्यत्रेति दुर्हत्वेनेति वलवदुमसाध्यज्ञानकत्वेनेत्यर्थः अत एव तत्सज्ञानस्य वलवदनिष्टसाधनत्वग्रहात् इच्छाविच्छे
दस्यादिति प्रतिवंधक जिज्ञासाभावेतन्निवृत्त्यवच्छिन्नवक्तव्यत्वेनोपमानस्यासिध्येदतः अनुमानस्यप्रवोधत्वोक्तिरि
त्यर्थः उपमानेप्राथमिकजिज्ञासाविरोधिदुर्वहकज्ञानेनिरसनीयवक्राद्रिकंहेतुरित्याहदुरूहत्वादितिदुरूहेपीति तथाचा
नुमानजिज्ञासायाः प्राथम्यस्य प्रतिवंधकत्वस्यासिध्यानद्वृत्तिनावस्यासंगच्छतेउपमानेनसंभवइत्याशयः औत्सर्गिकी
मितीति देवदत्ताप सारहि तत्र तिभाविशेषादिलक्षणाविलक्षणाकारणामून्यप्रुष्वीयप्राथमिके जिज्ञासायांतणमवि राम०
षयकत्वव्यापेत्ताव्याप्तिमाध्रित्येत्यर्थः प्रतिवंधकांतराभाववदितिकामिनिजिज्ञासादिलक्षणाप्रतिवंधकांतराभाव ३०

वत्त्वमनुमानजिज्ञासानिवृत्तेरपि स्वरूपसदेवोपमानं निरूपणे कारणत्वं तथा च तादृशनिवृत्तेर्जिज्ञासाजनकज्ञानल
विषयत्वाभावात्संगतित्वानुपपत्तिरित्याशयः अत एवेति यतः वक्तव्यत्वगर्भैवावसरसंगतिरत एवेत्यर्थः ग्रंथशेषे ग्रंथा
न्ते अवसरसंगतस्याभावेति निवृत्तिमात्रस्यावसरत्वे तदभावस्य वाधेन सूचनासंभवादित्यर्थः वक्तव्यस्यान्यथा त्वेतु वक्तव्यत
त्तत्तदभावस्य सूचनमुपप[illegible]द्यत इत्याशयः इतिशब्दस्य वक्तव्याभावस्य चकत्वं नस्फुटमतो विवक्षितइति अत्र विशेषण
त्वस्य उत्तरकालीननिरूपणाभावरूपस्य वक्तव्याभावादेव संभवादिति भावः स्वयमुपमाने अनुमानस्य अवसरसंगतेरे
वोक्ता इयेतु तत्रापि उपजीवकत्वमेव संगतिरिति व्याचक्षते तन्मतं दूषयति स्याह अत्रांतरयतीति अंतपदं व्याचष्टे उपमि
ति विषयीभूतेति उपमितिविषयीभूतं पदद्वयपदं तदर्थि त्रिकगोपदसदृशादिपदेत्यर्थः गवयपदस्य तु उपमितेः वशक्येत्वात्स्य
तया अतिदेशवाक्यार्थज्ञाने तदर्थस्याघटकतया च तच्छक्तिग्रहस्यातिदेशवाक्यार्थज्ञाने उपमितो वानपेक्षितत्वेन दृष्टान्ता
दायाउपमितेरशाब्दत्वनुमानोपजीवकत्वासंभवादिति भावः प्रवृत्तिनिवृत्तिकत्वानुमानपर्यंतानुधावनस्य बीजं दर्शयितुं

३१ गोसदृशादिपदनिष्ठशाब्दानुमित्युपजीवकत्वमुपमानस्य निराकरोति शब्दान्तरेत्यादि गोसदृशादिपदे इत्यर्थः व्यापारमात्रेति
शाब्दबोधद्वारेणातिदेशपदस्य संस्कारोपयोगित्वमित्यर्थः न तूपमितावितितथा चोपमितावनुमितिप्रयोजकत्वन्नयुज्यत इ
31 ति भावः तत्र हेतुमाह गोसादृश्यादीनामिति अयं गवयपदवाच्य इत्याकारिकाया एवोपमितेस्वीकारादिति भावः वस्तुतः उप
मितेः गोसादृश्यादेर्विषयत्वेपि न गवयादिपदशाब्दानुमितेस्तत्रापेक्षा शाब्दबोध एव तत्तत्पदार्थविषयके तत्तत्पदशक्ति
ज्ञानस्य कारणत्वात्तद्विषयतानवच्छिन्नजन्यतायास्तु शाब्दबोधस्य तस्यादिष्टत्वात् अयं गवयपदवाच्य इत्युपमितावपि संभवेन
सादृश्यविषयत्वेनोपमितेः शाब्दानुमितिप्रयोजकतानिराकरणस्यानुचितत्वादिति ध्येयं अत इति शाब्दानुमितिमादाय उपजी
वकतासंभवादित्यर्थः प्रवृत्तिनि[redacted]मित्तत्वबोधकमिति शाब्दबोधे शक्तिग्रहस्य विशेष्यतावच्छेदके शक्यता
वच्छेदकत्वावगाहित्वेनैव कारणत्वं वाच्यं द्वंद्वघटपदशक्यमित्यादिज्ञानस्यार्थस्मारकत्वस्य शाब्दबोधजनकत्वस्य च सर्वा राम
नुभवविरुद्धत्वात् तथा च अयं गवयपदवाच्य इत्युपमितेः शक्तिपरिच्छेदरूपत्वे गवयत्वादेः शक्यतावच्छेदकतावगाहित्वमाव ३१

ध्यकं तत्र गवयत्वावच्छेदकत्वविषयतायां न सादृश्यप्रत्यक्षातिदेशवाक्यार्थस्मरणादिघटितउपमानसामग्रीमात्रं
प्रयोजकं तस्य गवयत्वमात्रविषयताप्रयोजकत्वेन तदीयावच्छेदकविषयताया अप्रयोजकत्वात् अतः गवयपदं स्वप्र
वृत्तिनिमित्तकसाकपदत्वात् इत्यनुमितिसहकारेणोपमानस्य गवयत्वे वाच्यतावच्छेदकताग्राहकत्वमित्युपमितेर्ग
वयत्वनिष्ठवाच्यतावच्छेदकतावगाहित्वे गवयपदधर्मिकस्ववाच्यतावच्छेदकत्वरूपस्वप्रवृत्तिनिमित्तत्वानुमितेरुपजीव्यत्व
मितिप्रयुक्तमुपमितेरनुमानोपजीवकत्वमिति दर्शयतीत्यर्थः समानवित्तीति गवयत्वावच्छिन्ने गवयपदप्रवृत्तिनिमित्तवत्त्वोप
मितौ गवयपदे स्वप्रवृत्तिनिमित्तकत्वस्य समानवित्तिवेद्यताज्ञानस्य ग्राहकं गवयपदं स्वप्रवृत्तिनिमित्तकमित्यनुमानमित्य
र्थः तदेवोपपादयति गवय इति गवयपदप्रवृत्तिनिमित्तस्येति गवयपदनिष्ठस्वप्रवृत्तिनिमित्तकत्वस्य समानवित्तिवेद्यताज्ञा
नस्येत्यर्थः वयं तु ब्रूमः उपमानपदस्य स्वरूपफलोभयपरत्वेन स्वरूपोपजीवकतायां शाब्दान्तरसमयग्राहकस्यानुमानस्योपजी
व्यत्वं उपमितिलक्षणफलोपजीविकतायां स्वप्रवृत्तिनिमित्तकत्वानुमितिरूपानुमानफलस्योपजीव्यत्वं यथायथं प्रदर्श्यते

३२ अतोपमितौ गासांतरग्राहकस्यानुमानस्य उपमाने सप्रवृत्तिनिमित्तत्वबोधकानुमानस्यानुपयोगेपि न क्षतिरिति इत्येवदीधि
32 तिग्रंथतात्पर्यार्थं इति नन्वयं गवयपदवाच्य इत्येवोपमित्याकारात्कथमुपमितौ गवयपदप्रवृत्तिनिमित्तत्वविषयतेत्यत आ
ह इदं चेति आ[redacted]चार्यमते त्विति अत्रायं विवेकः उभयमतेपि धर्मिणि गवयपदवाच्यत्वभानं वजनीयमेव परं
तु मणिकृन्मते गवयत्वादेर्धूमव्यापकोवह्निरितिवद्गवयत्वादेर्वाच्यतावच्छेदकलक्षणांगवयपदप्रवृत्तिनिमित्तकं प्रकारः
आचार्यमते तु गवयत्वादावच्छेदकत्वं पदवाच्यत्वसंसर्ग इति विशेषः प्रवृत्तिनिमित्तकत्वबोधकानुमानस्य तु भयमते अपेक्षा
तो ल्मिति प्रसंगादाह अत्रोपमिताविशिष्टरूपविशिष्टेति अयं गोसदृश इत्याकारकपिंडप्रत्यक्षमेवेत्यर्थः तदेवेति शाब्द
बोधकरणं स्मृतिव्यापारः सादृश्यदर्शनं सहकारीति मतांतरव्यवच्छेदाय तदेवेत्युक्तं सादृश्यविशिष्टपिंडप्रत्यक्षमेवेत्यर्थः
अयं गोसदृश इति ज्ञानस्य समानधर्मितावच्छेदकतया गवयपदवाच्ये त्वुपमितौ कारणत्वमुक्तं न गोसदृशो गवयपदवाच्य राम०
इत्यतिदेशवाक्यार्थज्ञानभिन्नधर्मितावच्छेदकतापरं तु गोसादृश्य गवयपदवाच्यत्वयोः अवच्छेद्यावच्छेदकभावाग्रहे गव ३२

पत्वधर्मितावच्छेदकसादृश्यवत्त्वाज्ञानानु तद्धर्मितावच्छेदककपदवाच्यत्वप्रकारज्ञानानुपपत्तिरिति । अवच्छेद्यावच्छेदक
भावग्रहविषया गोसदृशो गवयपदवाच्य इत्यतिदेशार्थज्ञानापेक्षा नन्वेवं धूमवत्तावच्छेदेन वह्निमत्त्वग्रहे समानधर्मिता
वच्छेदककधूमकत्वाग्रहात् तादृशवह्न्यनुमितिवत्तूपमितेरप्यनुमितिसमानसामग्रीकत्वेनानुमितित्वमेवास्तां न प्र
मित्यंतरमिति चेत् न गोसदृशो गवयपदवाच्य इत्यस्य गवासदृशो न गवयपदवाच्य इति गोसादृश्यव्याप्यत्वस्य पदवाच्यता
दौ ग्रहणे सादृश्यपादौ गवयपदवाच्यत्वग्रहस्यानुमितिकारणस्याभावेनानुमित्यसंभवात् सादृश्यादौ गवयपदवाच्यत्वग्रह
स्यैव फलतः कारणत्वपर्यवसाने न सादृश्यज्ञानस्य परामर्शविधया कारणताप्रसक्तेः अत एव वह्निव्याप्यधूमवह्नानसा
दृश्याः पर्वतपदवाच्य इत्यत्र महानससादृश्यादेः पर्वतपदवाच्यताव्याप्यत्वेन पदवाच्यत्वज्ञानस्यानुमितिरूपत्वाभावाद्
गत्योपमितिरूपत्वमेवेति एवं गोसदृशो गवयपदवाच्य इति सादृश्यधर्मितावच्छेदकपदवाच्यत्वज्ञानादिघटितसामग्र्याः
नियमेन तत्प्रवृत्तिनिमित्तकत्वादि अनुमित्यंतरसामग्रीघटितत्वेन तज्जन्यज्ञानस्यानुमितिरूपत्वासंभवः न त्वनुमितेरनु

मित्संतत्सामग्र्यपेक्षानियमः इत्यनुमितिवैयधिकरण्यात् तज्ज्ञानस्योपमितित्वं तत्त्वमेव एवं गवयो गवयपदवाच्य इति नि
३२ 33 श्चयेपि सादृश्यविशिष्टपिंडप्रत्यक्षादिना गवयो गवयपदवाच्य इति प्रत्यभिज्ञानात्तज्जननेनापि न सादृश्यज्ञान
स्यानुमितित्वं सिद्धिरूपायाः अनुमित्यसंभवादिति नन्वेवमपि वह्निव्याप्यधूमवन्महानससदृशः पर्वतपदवाच्य इति
अतिदेशवाक्यार्थग्रहस्थले च तादृशधर्मिकतादृशसादृश्यग्रहवशात्तादृशे कथन्न पर्वतपदवाच्यविषयकोपमितिः
कारणस्यैव पक्षतात्वमहानससदृशे पूर्वोक्तदिशा बाधग्रहेण पदवाच्यत्वग्रहवारणेपि सदृशांतरे च तादृशे बाधने
तद्वारणासंभवादिति चेन्न महानससदृशो न पर्वतपदवाच्य इत्याकारकबाधस्य तत्राविशेषितत्वे तत्र न पदवाच्यमित्याका
रकविशेषरूपावच्छिन्नधर्मिकबाधबलादेव च तादृशे पर्वतपदवाच्यतोपमितिवारणसंभवात् तादृशविशेषबाधायस
त्त्वायां उक्तोपमितिजननस्येष्टत्वात् अतस्सर्वथापि अनुमितिसामग्र्यसंभवान्नानुमितित्वं शाब्दात्मकं तु गवयत्वादेः उप०
पदानुपस्थाप्यत्वेन दूरपराहतमेवेति अलमधिकेन एतावदतिप्रवृत्तिनिमित्तकत्वानुमित्यपेक्षाप्रदर्शनेनेत्यर्थः न ३२

न्नूपमानेतिस्वप्रवृत्तिनिमित्तकत्वानुमित्यपेक्षाप्रदर्शनेनेत्यर्थः नतूपमानेतिप्रवृत्तिनिमित्तकत्वानुमितेः उपमान
स्वरूपव्यापारे वानुपयोगादित्याशयः अंततदितीति अनुमानं तज्ज्ञानपेक्षापामपीत्यर्थः उपमानमिति उपमितेस्वप्रवृ
त्तिनिमित्तकत्वानुमितिमात्रायोपमानस्यादृष्टजनकप्रवृत्तसौपयिकानुमानमादायहृयोरप्युपजीवकत्वमित्यर्थः वस्तुत
स्तु अदृष्टजनकप्रवृत्तसौपयिकानुमानफलस्यापेक्षत्वमेव उपमानस्वरूपफलयोरनेनग्रंथेनप्रदर्शितमित्येवनत्वादित्यु
पमानेति। विशेषणतावच्छेदकप्रकारकनिर्णयविधयानुमानेपि उक्तोपमानोपजीवकत्वस्यसत्वादित्यर्थः निखिल
मेवेतीति निरूप्यतावच्छेदकोपमानत्वव्यापकोपजीवकतापितत्रास्तीत्याशयः वैपरीत्यंवारयति नैतिनोपजीवकतेति।
अनुमानत्वव्यापिकोपमानोपजीवकतानानुमानइत्यर्थः वन्ह्यानुमितौ व्यभिचारादित्याशयः अप्रदर्शनादिति संभवस्यापिउ
पमानेतादृशोपजीवकत्वसंगतेर्वन्ह्यादिसमनत्वादिति मूलस्यतत्प्रतिपादकत्वायोगात्स्वग्रंथस्यएववाक्यांतरेणतादृशसं
गतिः प्रतिपादनीयातथाचतत्प्रयोजकाकांक्षांतरकल्पनेगौरवमेतद्वन्ह्यादिमतेदुर्वारमेवअतैवचवन्ह्यादिसमनत्वादित्यस्य

३४ कथंचिल्लक्षणायामतादृशोपजीवकतापरत्वे उद्देश्यतालक्षणोयं धात्वर्थ एव दोष इत्यर्थः अनियामकत्व इति उपजीव्यत्वो
34 पजीवकत्वादेः पूर्वाभिहितलक्षणात्वेनानंतर्याव्याप्तिमित्यर्थः संभवति चेतीति तथा च निरूपणयोर्मिथः कार्यकारण
सत्त्वात् अर्थसिद्धमेव पौर्वापर्यमिति न तत्र गमकांतरजिज्ञासेत्याशयः नन्वेवं तर्हि गतमेव कार्यकारणभावस्यानंत
र्यनियामकत्वे संगतेवानंतर्यनियामकत्वं अत आह एवं चेति संगतिमुद्दिश्येति निरूप्यतकार्यकारणताभावादेरेव संगतिरू
पत्वे न शास्त्रकारैरुक्तो न तु निरूपणागत इति संगतेरानंतर्यानियामकत्वोक्तिविरोधेनेत्यर्थः निरूपणयोरपीति सप्रसंगायो
द्घातो हेतुतावसरैसादीहेतुतापदार्थस्य कार्यकारणभावस्य स्वाश्रयप्रतिपादकत्वस्वरूपसंबंधान्यतरसंबंधेने
वानंतराभिधानव्याप्यत्वं स्वरूपसंबंधस्वाश्रयप्रतिपाद्यत्वान्यतरसंबंधेन च जिज्ञासाजनकज्ञानविषयत्वमिति निरूपित
गतकार्यकारणभावस्यापि संगतित्वे बाधकाभाव इत्यर्थः तथापि स्वाश्रयप्रतिपादकत्वस्यैवानंतराभिधानव्याप्यताघट रा.म०
कतया स्वरूपसंबंधे च जिज्ञासाजनकज्ञानविषयतावताघटकत्वेन एकरूपेणोभयविवक्षया निर्वोढुमशक्यत्वात् ३४

जिज्ञासाजनकेनेति प्रत्यक्षनिरूपणाधीननिरूपणां किमितीत्याकारकजिज्ञासाजनकेत्यर्थः संगतेरंशो शेषांशा तत्त्वबोधेनै
व जिज्ञासाजनकज्ञानविषयत्वं न परं पराण एवं ग्रंथगतानंतर्यादि प्रयोजकत्वमेकवाक्यतागमकत्वं च पदं पद्ये वनस्पासा
न तथेवानुपपादात् तथा च निरूपणयोः कार्यकारणभावस्य संगतित्वस्य विवादमित्यस्य स्वरसः कश्चिदित्यनेन सूचितः स्वयंनि
रूपणापदं ज्ञानपरत्वेनैव व्याख्यातं तत्रानजनकशब्दपरत्वेन व्याचक्षाणानां मतं दर्शयति निरूपणयोरिति प्रयोजकभाव
इति प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणस्य वा कार्यज्ञानविषयतादृशानुमानज्ञानाधीनत्वेन तादृशानुमानज्ञानस्य
च विशेषणीभूतप्रत्यक्षज्ञानाधीनत्वात् प्रत्यक्षज्ञानस्य च तन्निरूपकशब्दाधीनत्वमिति क्रमेणानुमाननिरूपणस्य प्रत्य
क्षनिरूपणप्रयोज्यत्वमित्यर्थः कश्चिदिति अत्र प्रत्यक्षप्रतिपादकशब्दं विनापि प्रकारांतरेण प्रत्यक्षग्रहे तत्पूर्वकत्वेनानु
मानबोधकशब्दप्रयोगसंभवात् शब्दयोः प्रयोज्यप्रयोजकभावो सिद्ध एवेत्यस्य रसो बोध्यः ननु अथ तत्पूर्वकमित्यादिसू
त्रे अनुमानपदस्य ज्ञायमानलिंगपरत्वे कार्यकारणादिलिंगकत्वासंभवादमीतिपरत्वमेवेति वाच्यं तथा चानुमितेरेव प्र

३५ 35 त्यक्षपूर्वकत्वेन सूत्रे निरूपणात् प्रमाणनिरूपणयोः कार्यकारणभावस्यानंतर्यनियामकस्य तत्सत्त्वात्कथं सिद्धिः अतः
प्रमाणनिरूपणयोः कार्यकारणभावसिध्यर्थं तत्सूत्रं आचष्टे अथ तत्पूर्वकमित्यादि प्रत्यक्षलक्षणानंतरमिति अत्र प्र
त्यक्षानुमानपदे पूर्वोक्तरीत्या प्रमितिपरे वोध्ये पूर्वपदशेषपदयोः कार्यकारणपरत्वमित्याशयेनाह पूर्वं कारणमिति त
ल्लिंगकमिति तद्विषयीभूतार्थकारणलिंगमित्यर्थः पूर्ववदनुमानमुदाहृत्य दर्शयति यथांस्येति कार्यलिंगकमुदाहरति
यथा नदीति विशिष्टकूटस्य साध्यीभूतवृष्टिकार्यत्वादित्याशयः सामान्यतोदृष्टपदार्थमाह कार्यकारणभिन्नेति कार्यकार
णभिन्नत्वमेव सामान्यरूपं तेन दृष्टमित्यर्थः उदाहरतियथेच्छति अत्र कृतग्रंथे उक्तपूर्ववत्त्वादिनानुमानस्यानुरूपणात्प्रत्क
न निरूपणयोः कार्यकारणभावः न सूत्रलभ्य इत्याशंक्य पक्षांतरमाह यद्वेति विपूर्वमन्वयीति अन्वयिनः पूर्वं ग्रहणसंभाव्या
त्पूर्वमित्यर्थः शेषो व्यतिरेकीति व्यतिरेकस्यानंतरग्रहणस्वाभाव्यात् शेषमितिग्रहाधीनग्रहस्य व्यतिरेकी शिष्यस्य शेषत्वमि = राम.
त्यर्थः वह्न्यादिवाध्यस्य व्याप्तिरूपशास्यत्वेन सामान्यतोदृष्टत्वमित्याह सामान्यतस्सामान्येनेति परितार्थमाह एवं चेति पूर्वो ३५

क्षरीत्यानुमानपदस्य स्वरूपपरत्वसंभवादाह अत्र चेति प्रकृतोपयोगार्थमाह सूत्रे तत्पदत इतीति अनुमितिकरणस्यापीति
तथा च प्रत्यक्षप्रमाणपूर्वकत्वेनानुमाननिरूपणस्य सूत्रे सत्वात्प्रमाणनिरूपणयोः कार्यकारणभाव इत्यर्थः नन्वेवमपि प्र
णिकारमते परामर्शस्यैवानुमानप्रमाणतया तादृशनिरूपणस्य सूत्रबलादपि कार्यत्वालाभ एव अत आह तन्मतेपि सूत्रस्या
नुमानपदस्यानुमितिपरत्वपरिणामेन यथाश्रुतार्थाश्रयात् स्वरूपनिरूपणयोरेव कार्यकारणभावलाभात्स्वरसतः इति सं
गतिरित्याह फलायोगेतिज्ञापमानलिंगस्य फलायोगव्यवच्छिन्नत्वाभावान्न करणत्वमित्यर्थः यथाश्रुतार्थमेवेति लिंगपरा
मर्शार्थकमेवेत्यर्थः इदानीं करणमि—गत्वादेः परामर्शस्यानुपपन्नत्वाभावादिति भावः नाप्याहर्नेत्यमितिशब्दत एवानुमा
नप्रमाणलाभादित्यर्थः नन्वयाम्यादिप्रत्यक्षजन्यत्वेन परामर्शरूपानुमाननिरूपणोपस्य फलानुमानस्वरूपनिरूपणयोरे
व कार्यकारणभावो लभ्येत तथा च प्रमाणनिरूपणयोः फलनिरूपणयोश्च कार्यकारणभावालाभस्तदवस्थ एवेत्यत आह स्व
रूपनिरूपणयोः कार्यकारणभावालाभप्रकारं दर्शयति अत्र चेति तत्पूर्वकमित्यत्रेति तत्पूर्वकमनुमानमित्यत्रानुमानप

दस्यभावकारणत्वाश्रुत्यन्निभ्यां स्वरूपफलोपपत्तेर्व्याप्तिप्रत्यक्षजन्यत्वेन परामर्शात्मकानुमानस्वरूपस्य परामर्शात्मकप्रत्य
३६ 36 क्षजन्यत्वेनानुमितिरूपफलस्य निरूपणात्फलनिरूपणयोः कार्यकारणभावागमस्फुट एव व्याप्तिप्रत्यक्षजन्यत्वेन परामर्शा
त्मकानुमानस्वरूपनिरूपणस्य प्रत्यक्षफलनिरूपणाधीनत्वस्य यथाक्रमतालाभेपि प्रत्यक्षस्वरूपनिरूपणाधीनत्वलाभा
नत्वाभावार्थं तत्सदसेंद्रियार्थसन्निकर्षोत्पन्नत्वेन प्रत्यक्षपरामर्शकत्वमाश्रयणीयत्वमित्याह तत्स्यदेनेति तादृग्येण पूर्वम
प्रक्रांतत्वेन तत्स्यदेनापि तेन रूपेण कथं परामर्श इत्यत आह पूर्वस्तत्वेनेति स्वरूपनिरूपणयोरिति व्याप्तिप्रत्यक्षस्य परामर्शस्य
वानुमानत्वे तदात्मकस्वरूपस्य इंद्रियार्थसन्निकर्षोत्पन्नत्वेन निरूपणो प्रत्यक्षस्वरूपनिरूपणाधीनत्वं साक्षादेव लब्धं फ
लनिरूपणयोस्तु पूर्वोक्तरीत्या कार्यकारणभावस्फुट एव एवं चानुमानस्वरूपफलोभयनिरूपणेपि प्रत्यक्षस्वरूपफलनि
रूपणयोर्हेतुत्वावगमात्तनानंतर्यस्यानियम्यत्वमन्यथा इंद्रियार्थसन्निकर्षोत्पन्नत्वेन तत्सदस्य प्रत्यक्षपरामर्शकत्वाभावे एम०
प्रत्यक्षफलेति प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणमात्रलाभात्फलनिरूपणयोरुपजीव्योपजीवकभावलाभेप्यनुमानस्व ३६

रूपनिरूपणां शेषप्रत्यक्षफलनिरूपणाधीनत्वमेव लभ्येत न तु स्वरूपनिरूपणाधीनत्वमिति प्रकृतासंगतिरित्याशयः अत्र
त्वेति मणिकार्यनिरूपणयोरित्यर्थः नोपपादितइति अनुमानस्वरूपस्य चक्षुरादिपूर्वकत्वेन निरूपणे हि स्वरूपनिरू
पणयोः कार्यकारणभावो लभ्येत न त्विह तेन रूपेण निरूपणमित्याशयः सहचारप्रत्यक्षेतीति। अत्रापि प्रत्यक्षपदस्ये
न्द्रियत्वेनेन्द्रियजन्यज्ञानत्वेन प्रत्यक्षपरामर्शकतया स्वरूपनिरूपणयोः पूर्ववत्कार्यकारणभावावगमवश्यमइति नासंग
तिरित्याशयः अनुमानस्वरूपनिरूपणे प्रत्यक्षस्य विशेष्यतयैव निविष्टत्वात् न विशेषणज्ञानविधया प्रत्यक्षनिरूपणा
पेक्षेति न प्रकृतग्रन्थीयस्वरूपनिरूपणयोः कार्यकारणसंभव इति शंकते यद्यपीति प्रत्यक्षमप्रतिपाद्येति। तथा च विशेष
णज्ञानविधया प्रत्यक्षनिरूपणापेक्षाभावेपि विशेष्यतावच्छेदकप्रकारकज्ञानविधयैव प्रत्यक्षनिरूपणापेक्षेति सुलभ एव
कार्यकारणभाव इति भावः सामान्यतोक्तमनुमानस्वरूपनिरूपणस्य प्रत्यक्षस्वरूपनिरूपणाधीनत्वं विशदयति अत्रापीति
तेन रूपेणेति प्रत्यक्षस्वरूपकत्वरूपेणेत्यर्थः प्रत्यक्षानुमाननिरूपणयोः क्रमनियमकमुपपाद्यानुमानोपमानयोरपि तन्नियाम

37

कं दर्शयति । त्वाहेत्यनुमानोपमानयोरिति नन्वनुमानभिन्नत्वे न उपमाननिरूपणवत् उपमानभिन्नत्वेनानुमानस्यापि नि-
रूप्यत्वात् उपमाननिरूपणस्यापि प्रयोजकत्वापत्तिरत आह अनुमानस्येति अनुमानस्योपमानभिन्नत्वेन निरूपणं निर-
र्थकमेवानुमानस्य व्याप्तिज्ञानपक्षतादिघटितसामग्रीकत्वेनोपमानस्थले तत्सामग्र्यप्रसिध्या उपमानानन्तर्भावशंकाया
एवाभावात् अनुमानसामग्रीसत्त्वस्थले चोपमानसामग्र्याः सत्कार्येणानुमाने नैवसिद्धिसंभवात् अनुमानान्तर्भावप्रसक्तौ
न द्विनत्वे नोपमानखंडे तन्निरूपणमावश्यकमिति उपमाननिरूपणस्यैवानुमाननिरूपणाधीनत्वमित्याशयः इति सं
ति ग्रंथव्याख्यानं ॥ ॥ ॐ ॥ मूले तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानेत्यादिनानुमितिर्लक्षिता तत्र शमकाकांक्षायां
तत्प्रदर्शनपरतया लक्षणं स्वरूपेत्यादिग्रंथमवतारयति नन्वनुमानलक्षणमिति भावकरणस्तुत्यमिति अनुभयनिरूप-
णस्यैव प्रतिज्ञाने अनुमितिरेवादौ किमिति लक्षितेत्यर्थः पत्र प्रमाणत्वेन प्राधान्यात् अनुमानस्यैवादौ लक्षणीयत्वे
ति अनुमितिः किमिति लक्षितेत्यर्थः येषु सर्वेष्विति तत्करणमित्यत्र तत्पदेन तत्र लिंगपरामर्श इत्यत्र तादृशकरणत्वलक्षणत्व एम० रु

षितरूपतत्पदार्थघटकतया अथानुमानं तज्ज्ञानुमानमित्यादौ धर्मितावच्छेदकतया अनुमितेः विशेषणत्वादित्यर्थः न
नु उक्तविशेषणत्वस्य अनुमानेन निरूपणीय इति वाक्यार्थलाभात् तद्बोधकपदाभावात् एवमानेन निरूपणीये व्याप्तित्वविशि
ष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिरिति प्रथमोक्तान्वयविरोधश्च अनुमितेरनुमानाद्भिन्नत्वात् अतः विशेषणत्वलाभ
प्रकारो दर्शयितुमाह प्रामाण्यादिमिति नीनिरूपणगुणा इति तस्यैव पूर्वप्रक्रान्ततया तत्पदपरामर्शार्हत्वादिति भावः। विशेष
णत्वेनेति पूर्वोक्तरीत्या विशेषणत्वेनानुप्रविष्टेत्यर्थः तादृशानुप्रवेशस्यैव कथं लाभ इत्यत आह तथाचेति स्वविषयेके
तिस्वमनुमानं तद्विषयनिरूपणत्वकारत्वरूपमाधेयत्वं सममम्यर्थ इत्यर्थः ननु शब्दस्य प्रामाण्यादिप्रकारकत्वाभावात्क
थमेतदत आह व्याप्यारानुद्भितयेति स्वजन्यज्ञानद्वारेणेत्यर्थः अत्र केचित्तत्रसा र्थोहेत्वंतमेकोत्रंधः। ननु तत्रेति मू
लपाठधारणं स्वीयस्य च तत्रपदस्य प्रतिज्ञापरत्वं सममम्यर्थो निरूपणान्वयि विषयत्वं प्रतिज्ञाविषयीभूतं तन्निरूपणं त
द्विषये अनुज इत्यर्थः तस्य च आहेत्यनेनान्वयः। तथा च सति सममीयं प्रयोजकत्वं च दर्थः लक्षणाभिधानस्य निरूपण

त्मकतयाप्रयोज्यप्रयोजकभावासंभवेसविशेषणतोहीस्यादिमायात्निरूपणाघटकप्रतियसंघोल्लक्षणाभिधानस्यप्रयो
ज्यप्रयोजकाभावेतात्पर्यस्वरूपादिप्रतिपन्नावपित्ताभिधानप्रयोजकाकांक्षोत्थापकतयालक्षणाभिधानस्यप्रयोजक
त्वमवधेयमितितत्रवाधीयः पयस्यचभावेनभावलक्षणमितिपरिच्छेद्यक्रियांतरविवक्षायामेवगोषुदुह्यमानासुगत
इतिवत्सप्तमीविधानेननिरूपणीयेलक्षणमाहेसत्रएकक्रियाविवक्षायांतंडुलेपच्यमानेतंडुलंपचतीतिवत्सप्ति
सप्तम्यादुर्घटत्वात् नचलक्षणादिद्वितीयप्रकारकज्ञानादिगुणाश्रयात्मकस्यनिरूपणस्यएकदेशरूपलक्षणमात्रव
चनंभिन्नमेवेतिसतिसप्तम्योपपत्तिः तंडुलेपच्यमानेस्थालीमधिश्रियसाध्यप्रयोगेणावस्तुसत्क्रियांतरत्वरूपभेदस्यैव
प्रयोजकत्वेनएकदेशासाधारणाभेदमात्रस्याकिंचित्करत्वात् इयंङ·पितत्रैतस्यमूलपाठधारणात्वेलक्षणास्वरूपेस्यादेश्च
तद्व्याख्यारूपत्वेनतत्पदस्यलक्षणादिप्रकारकत्वेना [redacted] निरूपणापरामर्शकत्वानुपपत्तिः निरूपणस्य
निरूपत्वेनैवपूर्वप्रक्रांततयालक्षणादिप्रकारकत्वेनाप्रांतत्वात् व्याख्यामध्येत्रितीयांतभागकथनवितेधात् नचपूरणा

संमिलिते पंचम्यास्त्वेतिपुञ्जन्तेपूरणस्य तत्पदार्थस्यैवान्वयस्यवाच्यतया तदेकदेशनिरूपणेन तृतीयास्थान्वयायोगात् इति तदपि
ननिपूर्वकनिरूपयतेः लक्षणादिप्रकारकत्वेन ज्ञानानुकूलव्यापारवाच्यत्वेन लक्षणादिप्रकारकत्वे निरूपणस्य प्रक्रान्तता
याएवाभावादितिमतांतरमाह अनुमाने निरूपणीय इति अनुमाननिरूपणा इति क्रियायाः परिच्छेदकत्वलाभाय तत्प्राधान्ये
ननिर्देशः कश्चिदित्यस्वरसं अनुमाननिरूपणात्तस्य दोषस्याप्यत्वेधात्वर्थस्याप्यक्रियाभावात्सतिसप्तम्यनुपपत्तिरितिमतां
तरमाह अनुमाने निरूपणीय इति निमित्तसप्तमीति चर्मणि द्वीपिनं हन्तीत्यत्र चर्मार्थं द्वीपिहननमिति वदनुमाननिरूपणा
र्थमनुमितिनिरूपणमित्यर्थः ननु निमित्तसप्तमीविवक्षायामनुमाननिरूपणा इति निमित्तप्राधान्येनैव निर्देशसंभवात् अनु
माने निरूपणीय इति निर्देशोनुपपन्न इत्यत आह अनुमानस्येति निरूपणस्यानुमानविशेषणत्वेनानुमाननिरूप्यत इति पू
र्ववाक्येनाबोधितत्वात् तत्पदेनानुमानीयत्वेन निरूपणस्य तत्पदेन परामर्शसंभवात् तत्परामर्शयोग्यरूपेण निरूपणविशे
षणकत्वानानुमस्योक्तिरिति भावः। नन्वेवमनुमानस्यैव निमित्तत्वपर्यवसानात् वाक्यार्थबाधः इत्यत आह विशेषणस्येति

३९ 39 विशिष्टपदार्थे अपरपदार्थान्वयबोधकसमभिव्याहारस्य सविशेषणे हीति न्यायेन विशेष्यवाचे विशेषणे स्वार्थान्वयबोधक
त्वस्य स्वर्गो ध्वस्त इत्यादौ सर्वमते वक्तृतया त् अनुमानस्य निमित्तत्वबाधेपि निरूपणो निमित्तत्वान्वयतात्पर्येणानुमाने
निरूपणीय इति उक्तिरित्यर्थः अन्य इत्यत्रापि पूर्वोक्तैवासरस्तं उभयत्रापीति सतिसप्तमीपक्षे निमित्तसप्तमीपक्षे चेदित्य
र्थ इत्यन्वय इति अध्याहारेण तथान्वय इत्यर्थः सर्वत्रेति लक्षणादिषु सर्वेष्वित्यर्थः अनुमितिघटितमेवेति तत्कारणमित्या
दिकमेवेत्यर्थः अन्यथापीति व्याप्तिप्रकारकज्ञानत्वादिनापि तल्लक्षणसंभवादित्यर्थः अन्वयथाख्यातेक्रियाभेदे व्यक्तिभेदे इत्य
र्थः लाभाद्व्याप्तिशब्दोभयशब्दैकसमूहालंबनस्थले क्रियाभेदानुपपत्तिरतो व्याचष्टे मूर्तिकरणत्वमिति भेदो वेत्यास मिति अ
न्यथा एकस्यैव चक्षुरादेश्चाक्षुषादिव्यक्तिभेदे न करणताभेदापत्तिरित्याशयः प्रत्यक्षादितिप्रत्यक्षादीनां पृथक्प्रमाणत्वे
न तत्करणतामित्वकरणताकत्वमेव व्यक्तिभेदस्यापि तत्र निवेशो व्याप्तिशब्दोभयविषयकसमूहालंबनेपृथक्प्रमाण तम॰
त्वव्यवहारानुपपत्तिरित्याशयः इत्थं च करणताभेदग्रहस्य प्रमितिभेदग्रहाधीनतया तत्प्रमितिभेदग्रहार्थमादावनुमिति ३९

लक्षणमिति। इत्युपसंहरति। तथा चेति। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति मूले अनुमितिलक्षणमाह
पमिहसाध्यं अतिव्याप्तिवारणमव्याप्तिवारणां च तर्कव्याप्तिवारणाय जातिघटनया प्रत्यक्षत्वात्तन्नातीव तद्दर्शोपलक्ष
स्थेय इति अतिव्याप्तिवारणमेव प्रबलं प्रयोजनमिति अतिव्याप्तिवारणोपेक्षलक्षणवाक्यार्थवर्णने उपाध्यायानां निर्भ
रः स च कर्मधारयोत्तरभावप्रत्ययार्थघटितत्व एव निर्वहति अन्यथा हृदं द्वाराम्भयतो धूमो वह्निव्याप्यो धूमवान् पर्वत इति
ज्ञाने जन्येज्ञाने लक्षणातिव्याप्तेर्दुर्वारत्वात्कर्मधारयोत्तरभावप्रत्ययस्यार्थप्रयोगे तु प्रकृत्यर्थतावच्छेदकस्य भावप्रत्ययार्थ
त्वया घटपटत्वमित्यादौ घटत्वपटत्वयोरिव नीलोत्पलत्वमित्यादावपि नीलोत्पलत्वयोः द्वयोरपि प्रकृत्यर्थतावच्छेदक
तया भावप्रत्ययार्थोपस्थितिः इयांविशेषः घटपटत्वमित्यादौ प्रकृत्यर्थयोर्घटपटयोर्मिथो विशेषणविशेष्यभावानापन्न
यबोधात्तादृशप्रकृतिसमभिव्याहृतभावप्रत्ययार्थयोरपि विशेषणविशेष्यभावानापन्नस्तमः प्राधान्येनैव भानं नीलोत्प
लत्वमित्यादौ तु प्रकृत्यर्थयोरभिहितेन विशेषणविशेष्यभावापन्नाभानात्तत्तदुत्तरभावप्रत्ययार्थोरपि सामानाधिकरण्येन

४० 40

विशेषणविशेष्याभावप्रत्ययस्यैवमानमिति प्रकृते विशेषणसमभिव्याहारबलादेव कर्मधारयोत्तरभावप्रत्ययस्यासमानाधि-
करणे पि नैकपदार्थतावच्छेदकविशिष्टापरपदार्थतावच्छेदकबोधकत्वपर्यवसानात् वह्निव्याप्यो धूमो धूमवान् पर्वत इ-
ति ज्ञानस्य विशिष्टार्थविषयकताभावेनाभावप्रत्ययार्थतार्थाविषयकत्वात् न तज्जन्यज्ञानेतिव्याप्तिः तादृशाभावप्रत्ययां
तार्थावगाहिज्ञानजन्यस्यैव लक्षणत्वपर्यवसानात् वह्निव्याप्यधूमवान् पर्वत इति ज्ञानस्य वक्ष्यमाणरीत्याभावप्रत्ययार्थता
र्थावगाहित्वाच्च लक्षणसमन्वयोपपत्तिः इत्युपाध्यायो प्रकृतलक्षणे ज्ञातिघटनाया विवक्षितत्वे वक्ष्यमाणादिरीत्यैव
लक्षणस्य समन्वये व्याप्तिपक्षधर्मताविषयकत्वोपादानस्य जनकतादिनिवेशस्य च वैयर्थ्यापत्तेः ज्ञास्यघटनाभिप्रा
यमेवेदं लक्षणं तथात्वभावप्रत्ययप्रतिपाद्यविशिष्टार्थविषयकत्वस्य लक्षणे निवेशे वह्निव्याप्यधूमवान् ह्रदः वह्निव्याप्य
महानसत्वात् पर्वत इत्यादिज्ञानजन्यानुमित्याव्याप्तेर्दुर्वारत्वात् अतो व्याप्तिविशिष्टपक्षधर्मपदयोः ह्रदवृत्तीत्यस्य ह्रदह्रदोत्तरभावप्र-
त्यययाश्रयेतौ वलक्षणविधं व्याख्येयं तथा सति पूर्वोक्तरीत्या व्याप्तिविशिष्टत्वपक्षधर्मत्वयोः स्वतंत्रयोरेवभावप्रत्ययार्थतया उ राम० ४०

उभयप्रकारकज्ञानजन्यत्वस्यैव लक्षणत्वलाभात् न पूर्वोक्तमानुमितेरव्याप्तिः न चोक्तधूमवह्निव्याप्यधूमवान्पर्वत इति
ज्ञानजन्यैतिव्याप्तिः तदुभयविषयतयोरेकविषयतानिरूपितत्वस्यस्वातन्त्र्येण विशेषणतादेवातिव्याप्तेर्वारणीयत्वात् स्व
रूपहालंवनीयव्याप्तिविशिष्टत्वपक्षधर्मत्वविषयतयोः एकविषयतानिरूपितत्वाभावात् वह्निव्याप्यधूमवान्पर्वत इति
परामर्शीयज्ञाने द्वयोर्विषयतयोः एकविषयतानिरूपितत्वान्नलक्षणोपपत्तिरिति द्वंद्वोत्तरभावप्रत्ययार्थग्रहणमेवोचित
मिति मिश्राः तदुभयमतं दूषयन्तु उभाध्यायमतमाह वृत्त्यनुमितिव्याप्तिविशिष्टत्वेनसामानाधिकरण्यावगाहीनिसा
मानाधिकरण्येन एकपदार्थतावच्छेदकविशिष्टापरपदार्थतावच्छेदकावगाहीत्यर्थः ननु भावप्रत्ययोपात्तयोः प्रकृत्यर्थ
तावच्छेदकतयोः रूपप्रकृतिसमभिव्याहारपदेन तदीयभावप्रत्ययस्य विशेषणता[redacted]विशेष्यभावापन्नपदार्थता
वच्छेदकद्वयंबाधकत्वेन तदुभयसामानाधिकरण्यबोधकत्वपर्यवसानात् इत्यर्थः । नन्वेवं भावप्रत्ययार्थावगाहीज्ञानज
न्यत्वस्यैवलक्षणत्वपर्यवसानात् वह्निव्याप्यधूमवान्ह्रद इत्यादिज्ञानजन्यायां ह्रदो वह्निमानित्यनुमितावव्याप्तिः तत्रभा

५१ वप्रसमार्थस्य विशिष्टस्याप्रसिद्धेः अत आह ज्ञानपदोपसंहारेनेनेति ज्ञानपदस्थलीयविसर्गस्यार्थः तथा हि ज्ञानसमभि
51 व्याहृतविशिष्टवाचकपदानां विशेषणविशेष्यभावापन्नस्वघटकपदार्थान्वयबोधकत्ववत् विषयाविशेषणात् यथा
ज्ञानेपि प्रकारितया विशेषणान्वयबोधकमावश्यकं लोहितवह्निं जानाति रंगं रजतं जानातीत्यादौ विशेषदर्शनामपि वा
क्यार्थान्वयबोधात् न च लोहित्यादेः ज्ञानविशेषणत्वे वह्नौ लोहितो नवेति संशयानुपपादानुपपत्तिः वह्निविशेष्यकलो
हित्यनिर्णयस्य विरोधित्वादिति वाच्यं विशेषदर्शनां विशेष्यकलोहित्याभाववन्निर्णयेनेव संशयानुत्पादनिर्वाहात् रज
ते रंगत्वं न्यायादिविशेषणतया लोहित्यावगाहिनो भ्रमात्मकबोधस्यैव तादृशवाक्यात् संभवेन संशयस्य तु तरामेवाप्र
सक्तेः एवं च वह्निव्याप्यधूमवान् हृद इत्याकारकपरामर्शस्य व्याप्तिविशिष्टत्वविशिष्टपक्षधर्मताविषयकत्वं सामा
नाधिकरण्यसंबंधावच्छिन्नव्याप्तिविशिष्टत्वप्रकारताकत्वे सति पक्षधर्मताविषयकत्वरूपमेवेति तादृशपरामर्शस्यापि प म ०
भावप्रसंयां तार्थविशिष्टावगाहित्वेन तज्जन्यत्वस्य हृदो वह्निमानिति भ्रमानुमितावपक्षतत्त्वानाव्याप्तिरित्याशयः आप्या ५१

यं सामानाधिकरण्यत्वेनेति स्वनिरूपकनिरूप्यत्वसंबंधेनाधेयताविशिष्टाधेयतार्थेनेत्यर्थः तत्तत्पदार्थतावच्छेदकेति नी
लत्वोत्पलत्वीयसामानाधिकरण्यत्वेनेत्यर्थः। सामानाधिकरण्यलाभ इति सामानाधिकरण्यस्य नीलत्वोत्पलत्वीयत्वालाभ
इत्यर्थः पदार्थतावच्छेदकत्वेनेति एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयायोगात् अन्यथा घटो नास्ती दंडी
नास्तीत्यादौ घटत्वदंडादेरप्यभावान्वयापत्तेः तथा च धर्मिविशेषणतया प्रकृतिपदाद्रूपस्थितयोः नीलत्वोत्पलत्वयोः सा
मानाधिकरण्ये विशेषणत्वेनान्वयायोगात् तस्य नीलत्वोत्पलत्वीयत्वालाभ इत्याशयः तस्य दइति नीलोत्पलपदइत्यर्थः ल
क्षणेति तथा च तयोस्तंत्रोपस्थितत्वात् न सामानाधिकरण्यान्वयानुपपत्तिरित्याशयः सामानाधिकरण्यान्वयार्थं नीलोत्प
लयोर्लक्षणाशंकायामप्ययं चेत्कमयं विवक्षितं लक्षणामात्रं वा आश्रय आह गौरवादिति वृत्तिद्वयाश्रयणे गौरवादित्यर्थः द्विती
ये नीलत्वोत्पलत्वयोरिति बाधितत्वादिति तथा च नीलत्वोत्पलत्वयोरभेदस्यानंगीकारे वाक्यस्याप्रामाण्यापत्तिः अनंगीकारे
च कर्मधारयत्वानुपपत्तिरित्यर्थः ननु समानाधिकरणार्थद्वयबोधकत्वमेव कर्मधारयत्वं समानाधिकरणं च तादात्म्यप

टितंसंबंधांतरघटितंवत्तिनीलत्वोत्पलत्वयोःरपितद्दक्षतंनचैवंदंडकुंडलादित्पादावपिकर्मधारयत्वापत्तिलाक्षणिक
स्थलीयसंबंधांतरघटितसामानाधिकरण्यस्यैवतत्प्रयोजकत्वात्अतआहनीलोत्पलपदादितिद्वितीयइतितस्यदार्था
वच्छेदकसामानाधिकरण्यत्वेनप्राक्तिपसइत्यर्थःअवच्छेदकतासंबंधेनेतिअवच्छिन्नत्वस्यसंबंधेनेत्यर्थःअनंतशक्तिक
ल्पनेतिइदमुपलक्षणंनीलोत्पलत्वादीनांभावप्रत्ययार्थकोटौस्वरूपतस्सामानाधिकरण्यविशेषणतयानिवेशासंभवा-
त्नीलत्वोत्पलत्वत्वादीनांनिवेशेचतदनुपस्थितिदशायांताद्दशवाक्यस्याबोधकत्वापत्तिःइत्याद्यपिद्रष्टव्यंननुनीलत्वत्वा
दीनानुपस्थितिदशायांताद्दशवाक्यमबोधमेवेत्यतआहएवंघटत्वमित्यादावितिसामान्यातिरिक्तस्थलीयभावप्रत्ययइत्य
र्थःनीलोत्पलत्वमित्यत्रेतिसमासस्थलीयभावप्रत्ययइत्यर्थःविसन्निभेदेतिसमासस्थलीयभावप्रत्ययत्वसमासस्थलील
यभावप्रत्ययत्वादिनाप्रकृत्यर्थतावच्छेदकतत्सामानाधिकरण्यविशेषणात्वावच्छिन्नप्रतिष्ठत्वकारणत्वकल्पनापत्तिश्चे
तिपक्षद्वयसाधारणएवायंदोषइत्यर्थःकृत्तपाक्रेरेवेतिइतराष्ट्रनित्यादिनाधर्मत्वेनवापदस्यैवसमासस्यलेशशक्तिःकृत्वात

द्रास्यैवसमासस्थलेपिभावप्रत्ययस्यार्थकल्पनंपदार्थतावच्छेदकरूपसामानाधिकरण्यप्रदानानिर्वाहस्येत्यर्थः। समासस्थ
लीयशक्तिमेवादौनिर्द्धारयतित्तत्रद्वीतिघटत्वमित्याद्यसमासस्थलीयभावप्रत्ययइत्यर्थः। उद्दिस्याप्यतेति अन्वयबोधवि
षयीक्रियतइत्यर्थः प्रकृतितएवेतिप्रकृतिजन्यघटोपस्थित्यैवघटत्वस्येतरत्वादिपरिचायकतयाभानसंभवइतिनभावप्रत्य
यस्यतद्वाचकशक्तिकल्पनमित्यर्थः यत्रापीतिइतरावृत्तित्वसकलवृत्तित्वेयत्रापीत्यर्थः इतरद्वेद्दाभ्यपः वृत्तित्वमायेनतयावृ
त्तित्वमशेयताश्रयइतिविशकलितमितिपंचशक्तेदित्यर्थः नन्वितरावृत्तित्वेनचहेतुएवशक्तिकथमनुरोह्नतेअतआ
हइतरावृत्तित्वेतिअतिप्रसक्तत्वादितिघटत्वमित्यादौघटेतरावृत्तित्वसमुद्र्यत्वदावपिप्रसंगादित्यर्थः उभयाभावादित्त
त्रापिसंभवान्नचइतरावृत्तित्वमतेनकथमितरावृत्तित्वप्रतियोगिकाभावस्यलाभप्रसक्तिः नञ्योन्वयीतावच्छेदकावच्छिन्न
प्रतियोगिताकभावबोधकत्वादितिवाच्यंइतरावृत्तित्वाभावपदप्रतयाअदोषात् अप्रसिद्धेरितिवस्तुमात्रस्यैवाइ
तरावृत्तित्वादित्यर्थः ननुप्रकृतस्यार्थतावच्छेदकताघटकसंबंधावच्छिन्नेतरावृत्तित्वाभावस्यैवविवक्षिततयानतत्संबंधेनाइ

४३ न्नावेवतस्य प्रसिद्धेनाप्रसिद्धिदोषः अत आह घटत्वादावितिघटस्यापि परापेक्षया उन्नरत्वादिति भावः इतरवृत्तित्वावि
43 च्छिन्नेति यद्यपि आकाशावेदतादृशाभावप्रसिद्धिः तथापि तत्रवृत्तित्वत्वमेव प्रतियोगितावच्छेदकं नत्वत्वितांशोपीत्यप्र
सिद्धिप्रसिद्धः ननु गुणधर्मस्य अवच्छेदकत्वउपगम्यतामत आह घटत्वादावितितावतामिति इतरवृत्तित्व अभावामित्य
र्थः। परस्परउपक्षेपेणेति इतरस्य वृत्तित्वे निरूपितत्वसंबंधेन वृत्तित्वस्य अभावे वृत्तिप्रतियोगित्वसंबंधेन इत्यादिरीत्यापर
स्परविषयितानि निरूपिविषयता। शालिबोध इत्यर्थः अत्र च इतरादिपदार्थानां अन्वितान्वयनियमोपगमात् घटान्वि
तस्य नितरस्य वृत्तित्वे तादृशेन तदन्वितवृत्तित्वस्य अभावे अन्वय इति घटेतरवृत्तित्वतावच्छिन्नाभावरूपविषयाभावला
भः अत्र कश्चित्साकल्यं वृत्तिमद्वेत्यत्र आधेयात्मकस्य वृत्तिमत्पदार्थकस्य वाच्यतावच्छेदकत्वे इतरवृत्तित्वं अभाव इत्य
त्र प्रवृत्तित्वस्य वाच्यत्वाभ्युपगमो व्यर्थ इति न च वृत्तित्वस्याने वृत्तिमतेः वाच्यत्वे घटत्वमित्यादौ घटेतरवृत्तिमदभावस्य रामः
कालघटवृत्तित्साकारको बोधस्यात् न च तत्संभवति घटत्वादेः प्रमेयत्वादेस्सत्वेन तादृशाभावबाधादिति वाच्यं अभावस्य ४३

दा भेदरूपस्यैव विवक्षितं शक्यत्वेन तस्मिन् तात्पर्यावच्छिन्नप्रतियोगितया वृत्तिमतोन्वयेन घटे तद्वृत्तिभेदस्यैव लाभेन
अनुपपत्त्यभावादित्याह। नतु घटे तद्वृत्तित्वस्य संबंधसामान्यावच्छिन्नवृत्तित्वाभावरूपस्य विवक्षणे घटत्वादौ बाधः प्र
कृतस्यार्थतावच्छेदकतायां घटकसंबंधावच्छिन्नवृत्तित्वाभावस्य विवक्षणे घटत्वमित्यादौ कंबुग्रीवादिमत्वादेरपि भानापत्तिरतो
वृत्तिद्वयेपि प्रकृतस्यार्थकतायां घटकसंबंधावच्छिन्नत्वविशेषणं दत्तं इति तत्र प्रकृतीतीति तेन संबंधेनेति प्रकृतिजन्यबोधप्रकार
तावच्छेदकसंबंधेनेत्यर्थः कंबुग्रीवादिमत्वादेरिति तस्यापि समवायेन घटे तद्वृत्तित्वादित्यर्थः द्वितीयदले तादृशसंबंधा
वच्छिन्नत्वनिवेशे तु कंबुग्रीवादिमत्वादेः समवायेनावृत्तितया न दोष इत्याशयः प्रकृतस्थलेक्षमित्यस्याश्रयेतो वसामा
नाधिकरण्यापलाभमुपसंहरति प्रकृतस्यर्थः प्रकृतस्यार्थतावच्छेदकं च निरूप्य दर्शयति इति नीलोत्पलत्वमित्यादाविवक्षितयेति उत्प
लत्वादेरितरानवच्छिन्नस्य समवायेनैव वृत्तिः विशेषणानां तदवच्छिन्नस्य तु स्वरूपसंबंध एव प्रवृत्तिनियामक इति नीलोत्पल
पदरूपप्रकृतजन्यबोधे तदवच्छिन्नस्यैवोत्पलत्वस्य प्रकारतया स्वरूपसंबंध एव प्रकारतावच्छेदक अन्यथा समवायमात्र

स्यैव संसर्गत्वे तस्य नीलोत्पले तद्वृत्तित्वबोधेन बोधस्यैवानुपपत्तेरित्यर्थः तेन संबंधेनेति स्वरूपसंबंधेनेत तद्वृत्तित्वस्य
तद्वृत्तित्वस्य चाभिधाने तद्घटकतया सामानाधिकरण्यपदस्याप्यभिधानमवर्जितमेवेत्यर्थः तत्त्वभेदघटितत्वेन विशिष्टोत्प
लत्वघटकतयापि न सामानाधिकरण्यभानमत आह अभेदांशस्येति अर्थिकं त्विति न्यायादिति भावः अत्र वदंति नीलो
त्पलपदजन्यबोधे परि विशिष्टोत्पलत्वस्य प्रकारता भवति तदैव स्वरूपसंबंधस्यावच्छेदक इति तेन संबंधेन तद्वृत्त्यभिधान
प्रयुक्तसामानाधिकरण्यभानस्य पूर्वोक्तस्य निर्वाहः तदेव तु न संभवति विशिष्टप्रकारता हि विशेषणपुरस्कारेणोत्प
लत्वस्य प्रकारता विशेषणप्रकारतानिरूपितविशेषणतावच्छिन्ना वा पा विशेष्यप्रकारतेति परमार्थः न च नीलोत्पलपद
जन्यबोधे नीलत्वस्य नीलत्वसमवाय्यभिन्नसमवेतत्वस्य वा उत्पलत्वांशे प्रकारता संभवति नीलादिपदेन धर्मिविशेष
णतया नीलत्वादेरूपस्थापने नान्यत्र उत्पलत्वांशे विशेषणत्वादेनान्वयायोगात् नीलाभिन्नसमवेतत्वस्य तु उपस्थितिमा
त्रस्याभावात् नोत्पलत्वविशेषणतापत्तिः अतो विशिष्टप्रकारता अवयवशक्त्यतिरिक्तसमासशक्त्यैव निर्वाह्येति तो

दृशाशक्याश्रयेऽप्रसिद्धांतापत्तिः एवं नीलोत्पलत्वमित्यादौ नीलोत्पले तद्वृत्तित्वे सति सकलनीलोत्पलस्वरूपसंबंधे
न वृत्तित्वे विशिष्टोत्पलत्वस्य नीलोभिन्नोत्पलवृत्तित्वेनैव प्रविष्टत्वात् नीलत्वसमवाय्यभिन्नसमवेतत्वादिना विषय
त्वाभावात् न पदार्थतावच्छेदकताघटकसंसर्गावच्छिन्नसामानाधिकरण्यभानस्यापि निर्वाहः समवायेन तद्वृत्तित्वभाने
च तत्संबंधघटितेन वृत्तित्वभानानुपपत्तिः एवं नीलोत्पलमित्यादौ विशिष्टोत्पलत्वभानं तदपि च स्वरूपसंबंधेनाभ्युपगमे
इदमुत्पलत्वं नवेत्याद्याकारकसंशयादिप्रतिबंधकत्वानुपपत्तिः समवायावच्छिन्नोत्पलत्वादिप्रकारताज्ञाने स्वरूपसंबंधावच्छि
न्नतत्प्रकारकज्ञानस्याविरोधित्वात् एवं गुणान्यत्वविशिष्टसत्त्वमित्यादिवक्ष्यमाणग्रंथदशानदितरतदितरत्वव्यापका
त्यंताभावप्रतियोगितावच्छेदकतद्वृत्तिताभाववान्प्रतियोगितानवच्छेदकधर्मवत्त्वस्य दलद्वयार्थत्वेन परिष्कारेऽप्युक्तरामेव
सामानाधिकरण्यभानाप्रसक्तिः एतेन नीलत्वसमवाय्यभिन्ननिरूपितत्स्वरूपसंबंधावच्छिन्नवृत्तित्वेनाभिधाने नीलत्वसमवा
य्यभिन्नसमवेतत्वस्य तद्घटकतयाभानासंभवेऽपि विशिष्टोत्पलत्ववन्नीलोत्पलत्वसामानाधिकरण्यस्यापि सकलतद्वृत्ति

४५ 45 त्वेन स्वातंत्र्येणैवानसंभवात् ज्ञानानुपपत्तिरिति निरस्तं तस्मात् अतीवसमंजसमिदमिति तस्मात् पक्षधर्मत्वेनैवेति पक्षांत
रस्याग्रे निर्भरेणाश्रयणीयम् तथा यथा कथंचिदिदानीं वेप्याकरणादिपक्षाश्रयतो स्वरूपसंबंधेन विशिष्टप्रकारतज्ज्ञान
स्यापि समवायेन केवलोत्पलत्वादिप्रकारकज्ञानविरोधित्वाश्रयेण च मूलवाक्ययोजनपरो ग्रंथः इति नातीवात्र शंकाव
तारणीयमिति नन्वितरवृत्तित्वादिनाभावप्रत्ययप्राक्तो प्रमेयत्वमित्यादौ भावप्रत्ययानुपपत्तिः अतआह प्रमेयत्वमित्यत्रेति
नभासत इति शेषेनेनाभिचरन्त्यजेतेत्यादौ बलवदनिष्टानुबंधित्वादेरिवानेकार्थशक्तिकानां वहितार्थांशपरित्यागेन एक
देशांतरबोधकत्वस्य सर्वसिद्धत्वादित्यभिप्राय तदितरासमवेतत्वस्येति न चानुपदमेव विशिष्टस्योपाधितया स्वरूपसंबंधे
न वृत्तिरित्युक्तत्वात् इति शसमवेतत्वादिबाधस्याकिंचित्करत्वमिति वाच्यं तद्रूपधर्मस्य मतान्तराश्रयपरतया इदानीं सिद्धांतरी
त्या शंकावतारणादिति तदितरत्वव्यापकेति गुणान्यत्वविशिष्टतदितरत्वव्यापकाभावप्रतियोगितावच्छेदकताहशसह रा.म.०
त्वाभावप्रतियोगितानवच्छेदकविशिष्टसत्तात्वरूपधर्मवत्वस्य विशिष्टसत्वे संभवेनान्वयबोधानुपपत्तिरित्याशयः तदि ४५

तरत्वसमानाधिकरणेति विहाय व्यापकत्वपर्यन्तस्याऽवृत्तिं दर्शयति व्यापकेतीति कथं न लाभ इति एकत्वत्वादेर्द्विप
रिमत्वस्यापि दलद्वयवत्त्वेन परिमाणादेरपि तादृशधर्मवत्त्वादिति भावः प्रकृतस्यार्थतावच्छेदकेति प्रकृतस्यार्थतावच्छेदक
प्रतियोगिकत्वविशिष्टसमवायत्वादिना संबंधनिवेशाद्येन संबंधेन एकत्वद्वयवृत्तित्वं न परिमाणादेरिति न सद्भानोप
त्तिरित्याशयः अनन्तशक्तिकल्पनेति प्रकृतस्यार्थतावच्छेदकत्वस्यानुगमस्यानुभावे न घटत्वादिप्रतियोगिकसमवायत्वेनानि
वेशे घटत्वादिभेदेन शक्त्यभेदाव्यापकत्वे विशिष्य घटत्वादिनिवेशनानां कल्पने नौचित्यं लाघवात् किं गुरुरूपेण नानाशक्तिक शालि
ल्पनाक्लेशेनेत्यर्थः न च घटत्वादिविशिष्यशक्तिपक्षे किं निरवच्छिन्ना सावच्छिन्ना वा शक्तिः आद्ये घटत्वादेः स्वरूपतो विशिष्य
तोपगमे अवसिद्धांतापत्तिं द्वितीये घटे तदवृत्तित्वादिकमेवावच्छेदकमित्यात्मायेनापि गौरवसहनमिति वाच्यं इह घट
त्वमित्यादिप्रत्यक्षे घटत्वादेः स्वरूपतो विशिष्यत्वमणानुभविकाऽतः घटत्वमित्यादौ भावप्रत्ययस्यापि स्वरूपतो घटत्ववि
शेष्यशाब्दबोधजनकत्वमिष्टमेवऽन्यथा निर्विकल्पकानन्तरं कांचित्कस्य इह घटत्वमिति विप्र[illegible]सस्य तद्बुद्धित्वापातात् न हि

४६ 46 तत्र घटे न एष्टतित्वादिना घटत्वस्य विशेष्यतासंभवः पूर्वं घटत्वप्रकारकज्ञानाभावेन तद्रूपभानस्यैवासंभवात् न च स्वरूप
तो विशेष्ये विषयत्वे घटादेः स्वरूपप्रकारत्वासंभवेन घटत्वादिनैव प्रकारता वाच्या इति नाष्टशज्ञानस्य घटत्वप्रकारकज्ञाना
धीनत्वात् निर्विकल्पे कोऽत्र रं तदुःसति रेवास्तिमेवेति वाच्यं घटत्वादिना घटादेः प्रकारत्वासंभवेऽप्यटंत्वादिना घटादेः प्रकारत्वे बा
धकाभावात् इति वदंति प्रतिस्वीकरूपेणात्र द्व्याक्तित्वादिनैव स्वार्थ इत्यन्ये नन्वित्र एवं ज्ञित्वप्रकारतानिरूपितविशेष्यतयाभा
वप्रत्ययजन्यबोधे प्रकृतिजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वोपगमात् नैकत्वमित्यादौ परिमाणादेर्भानं इदमेव प्रकृत्यर्थ
तावच्छेदकनिरूपितत्वविशिष्टसंबंधेनेत्यादिनापि विवक्षितं प्रकृतित्वं च प्रकृत्सोस्यैव वषित्वादिकमेवेति नानुपगम इत्यत
आह पदे इति धर्मत्वेनैवेति उक्तरीत्या नियामकांतराश्रयणोपि लघुधर्मत्वेनैव शक्तिमुचिता न त्वित एवं ज्ञित्वादिरूपे
णेत्यर्थः घटत्वमित्यादौ द्रव्यत्वाभानं वारयति प्रकृत्यर्थतावच्छेदकेति प्रकृत्यर्थतावच्छेदकानुयोगिकाधेयतासंबंधेन स्व ए.म०
र्थः एतस्यापि पूर्वोक्त एव पर्यवसानं अत एवेति प्रातिस्विकरूपेण धर्मत्वेन वा शक्तिस्वीकारादेवेत्यर्थः तद्रूप्येणेति प्रपुं ४६

स्कत्वादिना घटत्वादेः स्वरूपेणानतिप्रसक्तिरित्यादिना वेत्यर्थः धर्मत्वेन वेति सर्वत्र धर्मत्वेनैवेवेत्यर्थः आसत्समाससाधारण्येन
क्तमशक्तिपक्षं समुच्चयसमासस्थलेऽभावप्रत्ययस्य विशेषणशक्तिपक्षेऽपि अन्वयप्रकारं दर्शयति विशिष्यशक्तौ चेति अव
च्छेदकत्वेनेति अवच्छेद्यत्वेनेत्यर्थः मतान्तरमाह घटपटत्वमित्यत्रेति सामान्यशक्तौ नेति प्रवृत्त्यर्थतावच्छेदकत्वोपलक्षितध
र्मत्वावच्छिन्ने भावप्रत्ययत्वावच्छिन्ननिरूपितशक्तेरित्यर्थः विशेष्यशक्तौ नेति अन्यथा कर्मधारयोत्तरेत्यादिमूलस्वारस्यविरोधा
दिति भावः सामानाधिकरण्येति तथा च कर्मधारयोत्तरभावप्रत्ययस्य विशेषणशक्त्यभ्युपगमेऽपि घटत्वपटत्वादिभेदेन नानाशक्ता
नेत्यं किंतु सामानाधिकरण्यत्वावच्छिन्ने एकैव शक्तिरित्याशयः उक्तरीत्या सामान्यशक्तौ नैव निर्वाहे विशेष्यशक्त्यन्तरस्वीकारे नौ
चित्यदूषितत्वमेवेत्यस्वारस्यः केचिदित्यनेन बोध्यः अत्र केचित्तद्धूमो वह्निव्याप्यो द्रव्यं पर्वतवृत्तीति ज्ञाने अतिव्याप्तिलक्ष
णस्य दूषणे एकविषयितानिरूपितताहशोभयाभाववज्ज्ञानजन्यत्वविवक्षणे तु उदाहृतज्ञानत्वे द्वंद्वाश्रयतोऽपि उक्तविवक्षासंभवेन न त
त्वं दुर्नोचितान्नन्वेकधर्मनिष्ठोभयाप्रवृत्तेश्च सामानाधिकरण्यं किंत्वेकपदार्थतानिष्ठपरपदार्थतावच्छेदकसामाना

४७ 47

धिकरण्यमेव एवं च पक्षसंबंधनिष्ठस्य व्याप्यवैशिष्ट्यस्य वत्संबंधस्य तत्प्रतियोगिकत्वरूपस्य सामानाधिकरण्यपदार्थत
या तदवगाहित्वस्य ज्ञाने विवक्षितत्वात् नोक्तसमूहालंबनसंग्रह मतस्य पर्वतसंयोगादौ वह्निसद्धूमप्रतियोगिकत्वा
वगाहित्वेपि व्याप्तिवैशिष्ट्यसंबंधावच्छिन्नधूमप्रतियोगिकत्वरूपविशिष्टपदार्थानवगाहित्वात् उक्तविशिष्टपदार्थात्म
कसामानाधिकरण्यस्यैव भावप्रत्ययार्थतया उक्तसमूहालंबनस्य भावप्रत्ययार्थानवगाहित्वादिति वाच्यभावप्रत्ययस्यान्वयप्र
तियाद्यविशिष्टावगाहित्वेन ज्ञानस्य लक्षणाघटकत्वे वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्यैवासंग्रहप्रसंगः पक्षसं
बंधनिष्ठत्वविशिष्टस्यैव दत्तप्रतियोगिकत्वस्य भावप्रत्ययप्रतिपाद्यतया परामर्शस्य प्रतियोगिकत्वविशेषणतया पक्ष
संबंधनिष्ठत्वानवगाहित्वेन तद्घटितविशिष्टविषयकत्वाभावात् पक्षसंबंधनिष्ठत्वस्य उपलक्षणत्वेन भावप्रत्ययार्थैकदेशे निवे
शात् तद्घटितविशिष्टार्थविषयत्वेनैव ज्ञानस्य लक्षणघटकत्वे इति नोक्तपरामर्शासंग्रह इति वाच्यं तथा सति वह्निव्याप्यधूम राम ४७
नितिपक्षानवगाहिज्ञानस्यापि संग्रहेण तज्ज्ञानस्य ज्ञानातिव्याप्तितादवस्थ्यात् एवं भावप्रत्ययेन वाक्यसामानाधिकरण्यप्र

तिपादनं प्रकृतस्यासाधारणधर्मस्यैव प्रकृतसाध्यतावच्छेदकस्यैव वाभाववत्त्वेन सामानाधिकरण्यस्याभाववत्त्वाभावात् न च
हृतद्धि समासेऽप्यः संबंधावगमस्तत्त्वदलभ्यामित्रुशासनात्प्रकृतस्यार्थतावच्छेदकस्यापि भावप्रत्ययार्थत्वमिति प्रकृतं तथा स
ति श्वेतनीलत्वज्ञात्तीत्युत्पलज्ञातीतिइत्यादिवाक्यजन्यबोधस्य श्वेतनीलोत्पलत्वमित्याद्विशेष्याद्यभावानवगाहित्व
पाविरोधित्वानुपपत्तेः न च एकपदार्थतावच्छेदकसामानाधिकरण्यावच्छिन्नमपरपदार्थतावच्छेदकं भावप्रत्ययार्थः सा
मानाधिकरण्यस्य वचनसादित्यस्यास्येतत्सरत्वमेव तदुक्तमुपाध्यायैस्तदुत्तरान्तत्वप्रत्ययो व्याप्तिविशिष्टत्वे सति पक्षधर्म
त्वंभावमाहेति एवं च संशोदिरूपपक्षधर्मत्वस्य सामानाधिकरण्यविशेष्यत्वेनैव भावप्रत्ययार्थे निवेशात्प्रतियोगिकत्ववि
शेषणको - पक्षत्वं धनिष्टत्वस्याप्रवेशेऽपि नोक्तपरामर्शासंग्रहः न वा पक्षाविषयकज्ञानसंग्रहप्रसंग इति वाच्यं भावप्रत्य
येन पक्षसंग्रहादेः इतरावृत्तित्वसहितसकलतद्वृत्तित्वेन प्रतिपादनं पक्षसंयोगत्वादिना वा आद्ये प्रतियोगित्वरूपस्वनित्व
विशेषणात्वेन पक्षधर्मस्य प्रकृतसाध्यस्य भावप्रत्ययानार्थेकूटे निवेशात्पक्षधर्मत्वावच्छिन्नघटितविशिष्टप्रतियोगित्वानवगा

हित्वेन परामर्शसंग्रहान्नाद्वयस्यं वह्निव्याप्यपर्वतवृत्तिधूमवान्पर्वत इत्यादिज्ञानस्यैव तादृशवृत्तित्वविशिष्टविषयता
त्पक्षधर्मत्वस्योपलक्षणत्वेपि व्याप्याभेदघटितधर्मप्रतियोगिकत्वरूपवृत्तित्वविशिष्टपक्षसंबंधादेनैव भावप्रसस्या
र्थतया तादृशाभेदघटितविशिष्टानवगाहिनामपि वैशिष्ट्यधूमनिष्ठप्रतियोगिकत्वपक्षसंबंधमात्रघटितविशिष्टावगा
हिनः वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य संग्रहो न प्रसक्तो विशेषका इति द्वितीये ताद्रूप्येण पक्षसंयोगादेः भावप्र
त्ययार्थत्वेपि प्रकृतसाध्यावच्छिन्नप्रसत्यार्थावगाहित्वेनैव ज्ञानस्य लक्षणाघटकतया भेदसंबंधेन व्याप्तिविशिष्टाभिन्नपक्ष
धर्मिण्यत्वेन पक्षसंबंधानवगाहिनः प्रकृतपरामर्शस्य प्रकृतसाध्यावच्छिन्नभावप्रसत्यार्थानवगाहित्वात् अस्य संग्रहात् द्वयस्यमे
वतस्मात्कथमपि भावप्रसत्यार्थावगाहित्वानजन्यत्वे लक्षणांशमंजसमिति वदंति अत्र च ब्रूमः प्रकृतसाध्यतावच्छेदकत्वोपल
क्षिते धर्मे मात्रे भावप्रसत्ययस्य शक्तिः न तु विशेषवृत्तित्वादिरूपेणापि गौरवात् घटत्वमित्यादौ घटत्वादेस्ताद्रूप्येण तद्व्यक्तित्वादिनै राम०
व स्वरूपतो वा विशेष्यतया भानं जातेः प्रकारतया इव विशेष्यतयापि स्वरूपतो दुर्वारत्वात् तादृशविशेष्यता संबंधेन भावप्रसत्य ४८

न्यबोधे किंचित्पदजन्योपस्थितेः प्रकारतासंबंधेन सहकारित्वं प्रकृतिप्रत्ययभावत्तानं च समवधानविधया निविष्टमिति
घटत्वमित्यादौ द्रव्यादिपदजन्योपस्थितिप्रकारकस्य द्रव्यत्वादेः भानप्रसक्तिरिति स्वरूपतो भानानर्हनीलत्वाद्यात्मकप्रकृ
त्यर्थतावच्छेदकानां तत्तद्रूपावच्छिन्नत्वपुरस्कारेणैव भानप्रत्ययप्रतिपाद्यत्वं प्रकृतेः यत्तद्धर्मावच्छिन्नबोधकत्वं यत्तद्धर्मा
वच्छिन्नबोधकतास्वार्थिकत्वं वा गृह्यते तत्तद्धर्मनिष्ठतादृशविषयताक एव बोधो भावप्रत्ययेन निव्यायत इति नीलघटत्वमि
त्यादौ गुणकजातिपुरस्कारेण नीलत्वादेः स्वरूपतो घटत्वादेश्च भानं परं तु घटपटत्वमित्यादिद्वंद्वोत्तरभावप्रत्ययार्थयोः घ
टत्वपटत्वयोर्विशेष्यविशेषणभावेनान्वयप्रयोजकस्य प्रकृत्यर्थयोर्विशेषणविशेष्यान्वयतात्पर्यस्याभावान्न विशेषणविशे
ष्यभावाच्छन्नापत्ता तदन्वयप्रयोजकस्य प्रकृत्यर्थयोर्विशेषणविशेष्यभावान्वयतात्पर्याभावस्य सत्वात् विशेषणविशेष्यभा
वानापन्नस्यैव घटत्वपटत्वयोर्भानं नीलोत्पलत्वमित्यादौ तु प्रकृत्यर्थयोर्विशेषणविशेष्यभावान्वयतात्पर्यग्राहकस्य समभिव्या
हारस्य सत्ताद्भावप्रत्ययार्थयोरपि प्रकृत्यर्थतावच्छेदकयोः विशेषणविशेष्यभावेनैवान्वय इति व्याप्तिविशिष्टपक्षधर्मताविषयक

४९ स्यज्ञानस्य लाभात्तु न सामानाधिकरण्यं नभावेन कर्मधारयोत्तरभावप्रत्ययस्य विशेषणशक्तिकल्पनं इदमेव च सामानाधि
करणपवचनत्वं प्रकृत्यर्थतावच्छेदकयोः विशेषणविशेष्यभावापत्तिप्रयोजकप्रकृतिसमभिव्याहारवत्त्वमिति एवं
49 व च धूमवह्निव्याप्यो द्रव्यं पर्वतवृत्तित्वादिज्ञानस्य व्याप्तिविशिष्टत्वावच्छिन्नपक्षधर्मताविषयकत्वाभावात् न संग्रहप्रसक्तिरिति
अत्र च नीलाभिन्नोत्पलवृत्तिनीलत्वविशिष्टोत्पलत्वमिति प्रकृत्यर्थतान्वयो भावप्रत्ययार्थे बोध्यः वह्निव्याप्यधूमवान्पर्वत
विशे इति परामर्शस्य यद्यपि न पक्षसंबंधांशे प्रकारतया व्याप्तिसंबंधावगाहित्वं तथापि तद्विशिष्टपक्षधर्मतावगाहित्वं न तद्विष
यतानिरूपितपक्षसंबंधनिष्ठविषयताकत्वं किंतु तदवच्छिन्नधर्मिविषयतानिरूपितपक्षसंबंधिधर्मिनिष्ठविषयताकत्वमेव
तच्चोक्तपरामर्शस्याप्यक्षतं न चैवमपि प्रकृत्यर्थवह्नित्वस्यैव एकपदार्थतावच्छेदकविशिष्टापरपदार्थतावच्छेदकस्य भावप्र
त्ययार्थतया व्याप्तिविशिष्टपक्षधर्मित्वे न पक्षसंबंधानवगाहिनो वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्यासंग्रहो दुर्वार राम॰
एवेति वाच्यं प्रकृत्यर्थसंबंधोपलक्षितप्रत्ययार्थान्वयस्यैव ज्ञानांशे विवक्षितत्वेन कस्यापि दोषस्यानवकाशादिति दीधितेज्ञा ४९

नपदोपसंदानेनेतिज्ञानबोधकपदसमभिव्याहारनियंत्रितअनुत्पत्तिविशेषणोऽस्यार्थाबाधिताबाधितेतिसमानाधिकरणतय
संबंधेनपक्षधर्मतांशेबाधितबोधितंचपतत्र्यापिवैशिष्ट्यंतद्विषयकज्ञानलाभादित्यर्थः अयमाशयः ज्ञानादिपदसम
भिव्याहारेपरस्परविशेषणतयास्वार्थान्वयबोधकयोरपिपदयोः परस्परविशेषणविशेष्यभावानापन्नज्ञानेपिविषयतया
स्वार्थान्वयबोधकत्वमावश्यकं नतुपरस्परविशेषणतयैव तथात्वं अन्यथा लोहितवह्निज्ञानानितिलोहितवह्निज्ञानानितिलो
हितवह्निज्ञानवाक्ये त्वं इत्यादिविशेषदर्शिप्रयोगानुपपत्तेः तादृशवाक्याद्बोधानुपपत्तेश्च वह्नि–लोहितइत्यादिविशेषणादर्शि
नस्त्वेनवह्निविशेषणतयालौहित्यावगाहिविशिष्टार्थबोधस्यतेषामसंभवात् द्वितीयकल्पत्तिस्वीकारेतुबाधदशायांव
ह्न्यादिविशेषणतयालौहित्यावगाहिज्ञानासंभवेपिप्रकारितयालौहित्यविशिष्टत्वेनविशेष्यतयावह्निविशिष्टत्वेनचज्ञान
स्यावबोधसंभवेतितादृशवाक्यप्रयोगस्यदुर्वहत्वेनानुपपत्त्यभावात् एवंचबाधानवतारेस्फुटसंज्ञानानीत्यादौद्वेधाप्यन्वयबोधः बाधाव
तारेतुएकविधएवेतिवह्निव्याप्यधूमवान्ह्रदइत्यादौह्रदवृत्तितांशेव्याप्तिवैशिष्ट्यस्यसामानाधिकरण्येनबोधसत्तात् व्याप्तिवैशि

५० 50 ष्यविषयकत्वे सति पक्षधर्मताविषयकत्वे नैव ज्ञानस्य लक्षणाप्रतिपाद्यतया भावप्रत्ययार्थावगाहिज्ञानत्वेन वह्निव्याप्यधूमवा
न्ह्रद इति परामर्शस्यापि संग्रहीतत्वात् न तज्जन्यानुमितावव्याप्तिः न च ज्ञानपदस्यलीयातिरिक्तव्युत्पत्तिस्वीकारे लोहितवह्निं जा
नातीति वाक्याद्व्ययो लोहित्यभ्रमस्येव कुमुदादौ नीलत्वभ्रमस्य नीलोत्पलं जानातीति वाक्यादिव इंदीवरं जानातीति वाक्या
दपि बोधापत्तिः इंदीवरादिपदस्यापि विशिष्टार्थबोधकत्वं विशेषादिति वाच्यं विशिष्टार्थबोधकताकस्येव उक्तादिशा दे
धान्वयकत्वोपगमेन केवले पदस्थले तादृशबोधासंभवात् अत एव प्रकृते भावप्रत्ययस्य प्रकृतिविशेषणसमभिव्याहारे
ण विशेषणाविशेष्यभावापन्नपदार्थावच्छेदकद्वयान्वयबोधकत्वमेवागत्याश्रयणीयम् अन्यथा सामानाधिकरण्यापादकत्वं
दृशान्याश्रयणे पूर्वोक्तदिशा विशेषणादिविषयकत्वेन ज्ञानान्वयबोधस्येव दौर्लभ्यापातादितिमाख्यायां बाधिताबाधिते
तिपक्षधर्मत्वांशे बाधितमबाधितं च यत्तादृशसामानाधिकरण्यमिति पूर्वोक्त एवार्थः भ्रांतस्यानुमितिरिति षष्ठीतत्पुरुषभ्रम राम० 
निवर्तनायाह भ्रांतं भ्रम इति तज्ज्ञानलाभादित्यत्र तत्पदस्य केवलव्याप्तिवैशिष्ट्यमात्रपरत्वं व्यक्तिकर्तृपदार्थतावच्छेदकद्व ५०

योपरक्तसामानाधिकरण्यपरत्वभ्रमेण विशिष्टसामानाधिकरण्याप्रसिद्धिनिबंधनभ्रमाप्रसिद्धिंकामवतारयति न च ह्र
द इति एकपदार्थता विशेषतापरपदार्थतावच्छेदकस्याभावप्रत्ययांतेन प्रतिपादने विज्ञानान्वयदशायां विशेषणमात्रस्य ज्ञा
नस्य लीयमुस्यतितावलेन पृथक्कृतस्य ज्ञानान्वयाय पृथक्कृतस्य विशेषणमात्रस्याप्रसिद्धभावात् पक्षधर्मतांशे तद्वृत्ता
ह्रिज्ञानवह्निव्याप्यधूमवान् ह्रद इति ज्ञानस्य संग्रहो निष्प्रत्यूह एवेत्याशयेन परिहरति तत्र ह्रदवृत्तित्व इति अयमर्थः न हि भा
वप्रत्ययार्थमात्रं लक्षणांपे न तदप्रसिध्या लक्षणाव्याप्तिस्यात् किंतु तद्घटितज्ञानादिरूपविशेष्यघटितवाक्यार्थघटितं न च वा
क्यार्थस्य तत्राप्रसिद्धिः ज्ञानादिपदघटितवाक्ये विषयाविशेषणतया ज्ञानविशेषणतयैव विशेषणान्वयस्य युक्तत्वं तत्र प्रसि
द्धतया विशिष्टपदार्थाप्रसिद्धावपि वाक्यार्थस्याबाधितस्यैव निष्पत्तेः महावाक्यार्थस्यापीतः शंखो नास्तीति लोहितवह्निर्नास्तीति
निखिलविशेषणादर्शिप्रयोगानिरोधेन महावाक्यार्थस्य अवांतरवाक्यार्थघटितत्वनियमो सिद्ध एवेति समुचितार्थः न तु महा
वाक्यार्थस्यावांतरवाक्यार्थत्वघटितत्वनियमे विषाणानशशयमिति बाधदशायामपि शशविषाणाजन्यं कार्मुकमिति कदाचि

५१ नमहावाक्यार्थबोधापत्तिः तस्यावांतरवाक्यार्थाघटितत्वेन तद्बाधनिर्णयाप्रतिबंध्यत्वात् अतः तत्प्रतिबाध्यत्वानुरोधेनावां
51 तरवाक्यार्थघटितत्वमेवमहावाक्यार्थस्य उपेयमितिमहावाक्यार्थाप्रसिध्यालक्षणाख्यानितादवस्थ्यमेवेत्यतआह अतएवे
तिअवांतरवाक्यार्थाघटितमहावाक्यार्थानभ्युपगमादेवेत्यर्थः अनेनैवेतिमहावाक्यार्थाप्रसिद्धिदोषेणैवेत्यर्थः ध्रंतस्या
नुमितिरितिषष्ठीतत्पुरुषंव्याचक्षाणानांतद्गानेत्यस्यतत्पदस्ययथाश्रुतपदार्थविच्छेदकद्वयोपरक्तसामानाधिकरण्यप
रत्वादनुरोधवतांमतंदूषयोपपन्नस्याति। केचित्तुतिपदालोकादावितितथाचबाधितसामानाधिकरण्यपदेनतद्देवग्राह्य
त्वाधूलीपटलेतद्विषयकंयद्ज्ञानंतज्जन्यानुमितेर्यथार्थायास्त्राव्याप्तिरित्यर्थः संदर्भविरोधादितिएतद्व्याप्तेः प्रमाणामिति
परत्वेनचप्रमाणप्रस्तावात् प्रस्तावेतिप्रकृताव्याप्त्युद्धारशंकानुपपत्तिः एवंचव्याप्त्यापक्षधर्मयोरित्यादिनाप्रमायामेवव्याप्तिरि
तिपुनः प्रमाव्याप्तिदानासंगतिरित्येतिपूर्वोत्तरग्रंथसंदर्भविरोधादित्यर्थः वह्निव्याप्येतिव्याप्यत्वविशिष्टपर्वतवृत्तिधूमवान्इतिज्ञा त०म०
नस्यानुमित्यजनकतयावह्निव्याप्यधूमवानित्यंशोक्तिः नचतादृशज्ञानस्यवह्निव्याप्यधूमवानित्यादिज्ञानवत्सर्वत्रवृत्तित्वादिज्ञान ५१

त्वस्य वन्हिवृत्तित्वादिरूपाधिकावगाहित्वेपि न जनकत्वक्षतिरिति वाच्यं तथापि व्याप्तिविशिष्टत्वप्रकारकत्वेन व्याप्यप्रकारतायाश्च
नुमित्यजनकत्वमित्याशयः प्रकृतलक्षणसत्वायाह व्याप्तिविशिष्टेतीति तेन रूपेणेति सामानाधिकरण्यविषयकत्वरूपेणेत्यर्थः
हेतुत्वग्रहादिति हेतुत्वाभ्युपगमादित्यर्थः तर्हि तर्हि व्याप्यधूमवान्पर्वत इत्यस्यैव परामर्शः तत्रानुमित्युपपत्तिः इत्याशंक्येष्टापत्ति
रेवेत्याह यत्रेति गौरवेणेतीति व्याप्त्यवच्छिन्नसंयोगसंबंधावच्छिन्नप्रकारताकत्वापेक्षया व्याप्तिवैशिष्ट्यपक्षसंबंधोपगीयसामा
नाधिकरण्यविषयकत्वस्य गौरवेणाजनकतावच्छेदकत्वानर्हत्वादित्यर्थः अनुमितिकारणतावच्छेदकविषयतासामानाधिकरण्य
विषयकस्यावश्यकत्वेपि परामर्शस्य विशिष्टज्ञानत्वान्यथानुपपत्त्येव सामानाधिकरण्यविषयकत्वमावश्यकं इति शंकोत्तर
त्वेन संबंधितसंबंधाग्रहेपीति ग्रंथस्य वक्तार्यति नन्विति एकाधिकरणेति एकसंबंधनिष्ठधर्मद्वयमित्यर्थः तद्विषयकत्वे वा परा
मर्शस्य कथमित्यत आह एवं चेति भेदान्यथेति विशिष्टज्ञानत्वं यदि विशेषणविशेष्यतत्संबंधकविषयज्ञानत्वं तदा दंडीपु
रुषो दंडीपुरुषसंयोगः उभयोर्विशेषापत्तिः अतः पुरुषानुयोगिकत्वं दंडप्रतियोगिकत्वादीनां संयोगे भानं स्वीकृत्येवस्य

५२ 52 मूहालंबनाद्वैलक्षण्यंपेनिवाच्यंतथाचवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शेव्याप्यविशिष्टवुद्धित्वधूमविशिष्टवुद्धित्वयो
स्सत्वेननिर्वाहायधूमेव्याप्तिवैशिष्ट्यानुयोगिकत्वस्यचभानमावश्यकमितितदेवसामानाधिकरण्यंभानमितिनाव्याप्ति
रित्यर्थः सामानाधिकरण्यपदस्यप्रकृतसर्थतावच्छेदकवृत्तिधर्मिपरत्वस्यधर्मितिष्ठोभयसंवंधपरत्वेनव्याख्यानमप्रकृतमित्य
भिप्रेत्यदृष्टांतविधयाप्रतियोगित्वानुयोगित्वाभाननमुपेत्यपदार्थतावच्छेदकधर्मस्यसामानाधिकरण्यस्यापिभानंभवि
ष्यतीतिशंकोत्तरत्वेनतदूर्ध्वमवतारयन्नामतमाहसमूहालंवनादितिसंवंधसंवंधेतीतितथाचसंवंधसंवंधविषयकत्वमे
वास्तिसंभवतत्वप्रसक्तसामानाधिकरण्यविषयकसिद्धिरित्यर्थः संवंधसंवंधभानस्यानुपपत्तिमूलकत्वेपिनसामानाधिकरण्य
स्यवाभावप्रत्यपार्थस्यापत्ति[illegible]पाततज्ज्ञानजन्यत्वघटितलक्षणासंभवइत्यर्थः ननुसामानाधिकरण्यत्वेनैवसामानाधिक
रण्यस्यलक्षणाघटकतयातत्रापिच्छसत्सामानाधिकरण्यस्यैवच्छसत्वात्स्वनुपनीतस्यपरामर्शेभानसंभवात्सामानाधि राम०
करण्यविषयकज्ञानत्वेनसंग्रहोनिवार्यएवेतिशंकतेनन्वसदेवेतिच्छसदोविषयतापोश्कारणायांवासन्निकर्षज्ञाना ५२

दिघटितत्वस्य सत्तादिसामग्र्याभावेन संसर्गतयेव भानं कदाचित्संभवतीति तदेव च वाचस्पतिमिश्रैः ॥८॥ तेन इदं रजतमित्यादौ र
जतत्वादिनिष्ठस्य रजतत्वादिसमवायस्य भानोपपत्ते शुक्त्यादेरेव रजतत्वापत्तिः न हि धर्मिणां परस्परसंसर्गभानं संस
र्गत्वांशे भ्रमत्वाभावाच्च कारे तु विपर्य — य इति मायातन्त्रतः प्रसिद्धसमवायस्याभानात् संभवात् न त्वतिरिक्तस्यैव शुक्त्या
नुयोगिक ॥ — — न त्वप्रतियोगिकसमवायस्यैवासत्तसंसर्गतया भानमावश्यकमिति सोऽयं वाचस्पति — — मतः सं
सर्गादिपक्षोऽप्यन्यत्र निरस्तः इति न तत्सत्ताश्रयेण विभ्रमानमितो लक्षणम् ॥ — — वइसाह अत्र सत इति सदुपरागेण
पीति ॥ रजतत्वादिप्रतियोगिकत्वेनापीत्यर्थः प्रतियो — — — द्धिरिति अत्र सत्त्यां निरासादित्यत्र अत्र सत्त्यो दिः प्रति
योग्यप्रसिध्या तदभावरूप — — — सत्ता संभवहेतोरप्रसिद्धिरित्यर्थः अत एव व्याप्तेः व्याप्तिनिष्ठासद्विषयकत्वाभ —
— — भानस्य सात्वं अतिरिक्तसामानाधिकरण्यापत्तिर्द्वित्वे कश्चिदित्यत्र रसः कथं तर्हि समूह — — — तद्विशिष्टज्ञानस्य
मेद इत्यत्र आह व्याहृत्य धर्ममेवाह समूहालंबन इति सर्वत्रेति निरू — — — रूपकभावानापन्नतावच्छिष्टविषयताकत्वे

५३ तावत्समूहालंबनत्वमित्यर्थः घटपटाविति — — — धर्म्मिणा इव तावद्धर्मिणं शोपि समूहालंबनत्वमेवेति द्रष्टव्यं विशे
53 षणाइति निरूप्यनिरूपक — — पत्र तावन्निष्ठविषयताशालिज्ञानत्वं तावद्विशिष्टबुद्धित्वमित्यर्थः ननु प्रतियोगित्वाद्य
योगि — — वगाहित्वघटितं दंडपुरुषसंयोगप्रतियोगित्वानुयोगित्वानीति समूहालंबनादिव्याप्तेद — — रत्वादिति भा
वः विषयतावैलक्षण्यादिति संसर्गांशे प्रकारांशे च विषयतावैलक्षण्यादेव — — र्थः शीतमिति विषयतावैलक्षण्यादेव
ज्ञाने वैलक्षण्योपगमे नीलपीतादिबुद्धीनां विषयताविषयतात्मकविज्ञानधर्मे नीलपीतत्वादिभेदेनैव वैलक्षण्योपगमे निर्वाहात्
अलं नीलपीतादिवात्यपदार्थकल्पनेनेत्याशयः विशिष्टधीविषय इति विशिष्टधीमात्रगम्यमित्यर्थः अनुयोगित्वप्रतियो
गित्वादेः संबंधांशे संबंधपदार्थरूपत्वेन समूहालंबनाविषयत्वात् नानुयोगित्वादिविषयकसमूहालंबनादिव्याप्तिरित्या
शयः भ्रमस्थले इतीति वह्निव्याप्यधूमवान् ह्रद इत्यादौ वह्निव्याप्यविशिष्टत्वह्रदवृत्तित्वउभयसामानाधिकरण्य संबंधे
न एकविशिष्टापरत्वादिति भावः भ्रमक्तिविशेष्यत्वेतिसामानाधिकरण्येन पक्षतामित्याशयेन वच्छेदकावच्छेदेन पक्षतायां राम०
५३

विशेषणतामप्रवेशलाघवलाभात् तथैवाहरजतत्वप्रकारतेति अर्थात् इति प्रमात्वघटकसंबंधावच्छिन्नत्वसिद्धौ रजतत्व
प्रकारताघटकसंबंधत्वावच्छेदेन प्रमात्वघटकसंबंधत्वाभावस्य गगनादिनिष्ठस्य प्रसक्तस्याधारतारूपावच्छिन्नस्याभावसि
ध्या रजतत्वप्रकारतानियामकसंबंधनिष्ठस्य प्रमात्वघटकसंबंधत्वाभावस्यैवासत्पदार्थत्वरूपत्वेन रजतत्वप्रकारतानिया
मकसंबंधे तादृशसंबंधत्वाभावशून्यत्वे तादृशसंबंधत्वाभावनिरूढत्वेतद्दाननिरूढैर्वा सत्त्वातिनिरासरूपत्वमित्याशयः
नियमभंगादिति तस्मान्नियमेन रजतत्वप्रकारकसंबंधसामान्ये प्रमात्वघटकसंबंधत्वाभावस्य भंगः स एव चासत्त्वातिनि
रासपदार्थ इत्याशयः एवं संसर्गताभावः तानापिरित्यादिरप्यसत्त्वातिनिवेधप्रकारो वोध्यः संसर्गकताभावस्य निर्विष
यके भूतलादौ प्रसिद्धत्वात् किंचिदर्पितानेन तस्यादर्शितत्वात् न च निर्विकल्पकत्वमादाय बाधः सविकल्पकावृत्तित्वस्यैव विवक्षि
तत्वात् न चैवं निर्विकल्पात्मकासत्त्वापत्तिः विकल्पके संसर्गाभानेन तत्र सख्यात्वप्रसक्तेः सत्संसर्गाभानस्यैवासख्यादित्वा
दिति ननु उभयसामानाधिकरण्यपलक्षणाभावप्रत्ययार्थस्य प्रतिद्वावपि विशिष्टवाचकसमभिव्याहृततानपदघटितवा

५४ कार्यस्य लघुत्वस्यानंतरस्यैव स्वीकारात् तत्पुरुषत्रितल्पावांतरवाक्यार्थघटितमहावाक्यार्थस्य पक्षधर्मत्वे व्याप्तिविशिष्टत्वा
54 भावग्राहिज्ञानत्वस्यजत्रापितं भवान्नातिव्याप्तिः पक्षधर्मत्वे व्याप्यविशिष्टत्वस्य समानाधिकरणस्य बाधग्रहे पिज्ञानवि
शेषणतया तद्बुद्धे बाधस्याविरोधित्वात् इति पूर्वोक्तप्रकारेणाव्याप्तिमुद्धरंत्यवांतरवाक्यार्थेत्यादिग्रंथमवतारयति ननु पक्ष
वृत्तित्वइति ताद्दशज्ञानान्वय इति ज्ञानपदसमभिव्याहारेवांतरवाक्यार्थघटितापूर्ववाक्यार्थप्रकारस्यैवाभ्युपगमादित्याश
यः नैताद्दशेति विशिष्टार्थबोधकपदसमभिव्याहृतवाक्यस्य विशिष्टार्थविषयकबोधजनकत्वस्यानुभवयुक्तिविरुद्धत्वे
न प्रकृतवाक्यस्य विशिष्टार्थबोधकपदसमभिव्याहृतात् विशिष्टाघटितो वाक्यार्थो नेतल्लक्षणोपतिपाद्य इत्याशयः दी
धितौ अवांतरेति अवांतरवाक्यार्थबाधस्य महावाक्यार्थबोधाभावव्याप्यत्वात् महावाक्यार्थभावव्याप्यत्वाद्वा महावाक्या
भावे न तद्ज्ञानजन्यत्वलक्षणस्यैवासंभव इत्याशयः नन्वांतरवाक्यार्थबाधस्य महावाक्यार्थबाधव्याप्यत्वे महावाक्यार्थ ग.म०
ज्ञानाभावे [redacted] व्याप्यत्वे वाममानाभावः वह्निर्नीलो ह्रिज्ञः शंखो न पीतः इत्यादिबाधसत्वेपि लोहितवह्निं जानातिपी ५४

तश्शं खोनास्येत्यादिवाक्यात् महावाक्यार्थबोधस्यानुभवसिद्धत्वात् इत्यत आह विषयताइति तथा च महावाक्यार्थबोधे अवां
तरवाक्यार्थबाधस्याविरोधित्वे विषयतात्वावच्छेदेन शाशसंबंधाभावनिर्णयेपि शाशविषयताजन्यं कार्मुकमिति वाक्यान्महा
वाक्यार्थबोधापत्तिः अतः अवांतरवाक्यार्थबाधनिर्णयस्य महावाक्यार्थबोधविरोधित्वध्रौव्ये प्रकृते एतद्वाक्ये महावाक्यार्थ
भावेन तदात्मकलक्षणासंभवो दुर्वार एवेत्याशयः ननु अवांतरवाक्यार्थघटितमहावाक्यार्थबुद्धित्वमेवावांतरवाक्यार्थबाध
निर्णयप्रतिबध्यतावच्छेदकं न तु प्रतिपाद्यमहावाक्यार्थबुद्धित्वमात्रं शाशविषयावाक्यजन्यबोधेवांतरवाक्यार्थघटितत्वा
त्तद्बाधस्य विरोधित्वमेव लोहितवह्निं जानातीत्यादिवाक्येषु महावाक्यार्थस्यावांतरवाक्यार्थाघटितत्वात् न तत्र बाधस्याविरो
धित्वं इति चेत् शाशविषयतादिवाक्ये पि अवांतरवाधनिर्णयदशायां अवांतरवाक्यार्थाघटितमहावाक्यार्थबोधस्यैवाबाध
त्वात् न चावांतरवाक्यार्थाघटितमहावाक्यार्थबोधप्रयोजकस्य ज्ञानाभावात् पदद्वयसमभिव्याहारस्याभावात् न तत्र तदापत्तिः
शाशविषयतादिवाक्ये वांतरवाक्यार्थघटितमहावाक्यार्थबोधापत्तिभयेन तादृशबोधस्यैवासिद्धत्वेन ज्ञानादिपदद्वयसमभि

५५ व्याहारहेतुतायाएवासिद्धेः यदिच अवांतरवाक्यार्थाघटितमहावाक्यार्थबोधेपि अवांतरतात्पर्यनिर्णयस्यस्वातंत्र्येणोववि
रोधित्वंचयतोग्रामविषयाणादिवाक्यस्थलेतादृशबोधापत्तिरित्युच्यतेतदाप्रकृतेपि अवांतरवाधनिर्णयसत्वेनवाक्यार्थ
55 बोधमात्रस्यासंभवात् एतद्वाक्यप्रतिपाद्यवाक्यार्थाप्रसिध्यादुर्द्धरैवलक्षणाव्याप्तिः इतिदीधितिकृतामभिप्रायः ज्ञानाभा
वपदसमभिव्याहारे अवांतरवाक्यार्थवाधदशायामपिमहावाक्यार्थबोधस्यानुभवसिद्धत्वेनज्ञानादिपदासमभिव्याहृतम
हावाक्यार्थबुद्धित्वमेव अवांतरवाधनिर्णयप्रतिवध्यतावच्छेदकमास्थीयते एवंचग्रामविषयाणादिवाक्येवाक्यार्थबोधमात्र
स्यैवापत्त्यभावात् नपूर्वोक्तदशायामन्नप्रतिवंधकतानुपपत्तिः एवंचज्ञानादिपदस्थलेविशिष्टविषयाविशेषणतयाज्ञाना
भावादिविशेषणतयाविशेषणावगाहित्वेप्रतियोगित्वविषयित्वसंबंधावच्छिन्नप्रकारतावच्छेदकतान्यप्रकारतायावा
धप्रतिवध्यतावच्छेदकत्वेवाज्ञानाभावादिविशेषणत्वेनवन्हिशून्यत्वादिविशेषणत्वेनवालोहितपीताद्यवगाहिमहावा राम०
क्यार्थज्ञानस्यनिष्प्रत्यूहतयावाक्यार्थीभूततादृशज्ञानजन्यत्वस्यलक्षणस्यसाम्राज्यमेवेतियत्पतिमतामभिप्रायः स्व ५५

पमवांतरवाक्यार्थबाधस्य महावाक्यार्थाभाववाक्यार्थत्वं तद्बोधाभावव्याप्यत्वं वा इत्येतन्मदर्शनद्वारेण एतद्वाक्यप्रतिपाद्यार्थह
पलक्षणप्रदर्शनेनाक्षिपति त्वमवांतरवाक्येत्यादिग्रंथं दर्शितं तमप्रमवस्थलेत्यादिवाकं लक्षणतत्त्वरूपाप्राप्तिप्रदर्शनपरम
वांतरेत्यादिवाकं तु लक्षणग्रहानुपपत्तिपरमिति वर्णयितामतमाह लक्षणमाप्तिमितिकश्चिदित्यस्यार्थः ग्रहानुपपत्तेर्लक्ष
णदोषत्वाभावात् बाधाग्रहदशायां लक्षणाग्रहस्यापि संभवाच्चेनेदृशमितिविषयत्वसामानाधिकरण्येन बाधदशायांश
शाविषयाणजन्यं कार्मिकमितिवाक्याद्बोधस्येत्यादाह विषयत्वावच्छेदेनेति ननु शाब्दविषयेणेति तत्स्वरूपजन्यबोधस्यतादा
त्म्येन शाब्दसंबंधिप्रकारकत्वात् तत्र भेदनिर्णयस्यैव प्रतिबंधकतायाः कथं शाब्दसंबंधाभावनिर्णयस्य विरोधित्वमत आह शा
शाविषयोस्येति प्रस्तावपदस्य निरूपणप्रतिज्ञापरत्वं दर्शयितुमाह प्रमाणत्वमिति प्रमेयेत्येवकालव्यावर्त्यं दर्शयति न
तु प्रमाकरणोतिनन्वत्र लक्ष्यतावच्छेदकीभूतं प्रमात्वं कीदृशमिह विवक्षितं प्रदितद्भूतितत्प्रकारकत्वरूपं तदा ह्रदो वह्निमानि
त्यनुमेरपि वह्निमत्त्वांशे तथात्वात् लक्ष्यत्वं दुर्वारं यावद्भूमपिनत्वविवक्षणे ह्रदो वह्निमान्पर्वतश्च वह्निमानिति समूहालंबनानु

५६
56

मितावेवालक्ष्यतयातिव्याप्तिसंभवे यदि चेत्सादिना संदिग्धासंकीर्णवाधोदाहरणस्थलपर्यन्तानुधावनं विरुध्येताविधे
यांशेऽभ्रमभिन्नत्वविवक्षणे लिंगोपाधाननिरासेनेति अग्रीमग्रंथानुस्थितिः लिंगोपाधानाश्रयेपि विधेयांशेऽभ्रमभिन्नत्वो
पायेन लक्ष्यतावर्जनादिति चेत् तत्संनभ्रमभिन्नत्वं अनुमितिविशेषणं तथा लक्ष्यतावच्छेदकं किंतु भ्रमान्निवृत्तिविषयाव
त्वमेव तच्च भ्रमात्मकसमूहालंवन एव संभवति समूहालंवनस्य लक्ष्यत्वानपायात् अग्रिमासंकीर्णवाधोदाहरणासंग
तिः ज्ञानव्यक्तिभेदेनैव विषयताभेदाभावात् ह्रदो वह्निमानित्यनुमितौ तु विशिष्टविषयतायाः भ्रममात्रवृत्तित्वेन भ्रमान्यवि
षयतावत्वविरहात् नान्यवृत्तिविषयतावत्वविरहाल्लक्ष्यत्वनिरासः लिंगोपधानाश्रयेप्यपि वह्नित्वावच्छिन्नप्रकारतानिरू
पितहुद्रूपर्वतत्वावच्छिन्नविशेष्यतायामपि भ्रमान्निवृत्तित्वात् न वहिर्भावसंगतिः तथाविपरामर्शजन्यतावच्छेदकत्वेन विशे
षतायां विशेषणात् लिंगोपधानस्थले लिंगपक्षतावच्छेदकोभयावच्छिन्नपर्वतविशेष्यताया एव परामर्शजन्यतावच्छेदकत्वे राम ०
न तस्याश्च भ्रमान्निवृत्तित्वाभावात् तद्वहिर्भावसंगतिः नन्वनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताग्रहे पक्षतावच्छेदकोव ५६

छेदेन साध्यमानस्यैवौत्सर्गिकत्वात् गंधव्याप्यपृथिवीत्ववान् गंधप्रागभावावच्छिन्नो घट इति परामर्शात् गंधप्रागभा
वावच्छेदेन गंधानुमितिः औत्सर्ग्य एवेति कथं तत्र यदि चेत्सनिर्भरोक्तिः अतस्तदभिप्रायं दर्शयति उपाध्यमतेति पक्षता
वच्छेदकसमानाधिकरण्येनैवेति पर्वतो वह्निमानित्यनुमितौ संयोगत्वेनैव संयोगो वह्निसंसर्गतया भासते न तु पर्वतत्व
व्यापकत्वविशिष्टसंयोगत्वेनेत्यर्थः तत्र हेतुमाह अवच्छेदकत्वस्येति यत्र धूमस्तत्पर्वतत्वव्यापकत्वविशिष्टसंयोगसंबं ३
धेन वह्निरित्येवं विशेषरूपेण व्यापकताया असंभवात् ग्रहाद्यघटकतावच्छेदकरूपेणैव च साध्यसंसर्गस्यानुमितौ भाननिय
मात् विशेषरूपेण संयोगादेः संसर्गत्वसंभव इत्यर्थः भ्रम एवेति गुरुसमवायसंबंधेनैव गंधस्य घटे भानादित्याशयः अनु
मितावच्छेदकत्वमाननमंगीकुर्वतामुपपत्तिं दर्शयति पक्षतावच्छेदकावच्छेदेनेति साध्येन तत्संबंध एव पक्षतावच्छेदकावच्छि
न्नत्वभानस्यानुभविकत्वादित्यर्थः न चोक्तसामग्रीबाधः पक्षतावच्छेदकावच्छिन्नत्वातिरिक्तसाध्यसंसर्गविषयताया एवव्या
पकत्वग्रहविषयतानियम्यत्वेन पक्षतावच्छेदकावच्छिन्नत्वविषयतायाः पक्षधर्मतीयावच्छेदकत्वग्रहविषयतामात्रप्र

५१ प्रकृतत्वेन न सामञ्जस्यं तत्र बलेन पक्षतावच्छेदकावच्छिन्नत्वभाने वाधकाभाव इत्याशयः सामञ्जस्यं तस्मे वाह अ संसर्गाग्रहादिति
पर्वतत्वव्यापकत्वविशिष्टसंयोगसंबंधावच्छिन्नवन्ह्यादिप्रकारताकबुद्धौ पर्वतत्वव्यापकत्वविशिष्टसंयोगादिसंबं
57 धावच्छिन्नवत्ताग्रहभावप्रकारकवाधाभावपक्षधर्मत्वीयावच्छेदकग्रहविषयत्वादिरूपसामान्यसामग्रीसंभवेन नानुमि
तावच्छेदकत्वभानविरोध इति भावः एतेन सर्वत्रानुमाने पक्षतावच्छेदकसाध्ययोः सामानाधिकरण्यमेभासते न तु तयोः अ
घ। वच्छेद[illegible]वच्छेदकभावोपि तेन विनापि हेतोः व्याप्तिपक्षधर्मत्वोपपत्तेः तद्बाधकबलाभावात्तु अतः उक्तबाधासंकरस्थलस्येता
सिद्धेः एवं उक्तबाधासंकरस्थलानुपगमेपि वह्निर्महानसीयत्वेलाघवमितिलाघवोपनीतमहानसीयवन्यादिविषयक
पर्वतादिपक्षतानुमितौ तन्मतेनालक्ष्यायां अतिव्याप्तिवारणायैव लक्षणे प्रमत्वनिवेशावश्यकत्वे यदि तेनेति अ संकीर्ण
वाधाभ्युपगमपक्षीयत्वप्रमापर्दस्येस्य संगतमेवेति तत्र पक्षधर्मतायाः पक्षतावच्छेदकसामानाधिकरण्यं न व्यापकत्वभेदे ग.म.
नद्वैविध्यात्तत्साध्यस्यपक्षतावच्छेदकव्यापकताविनाहेतोस्सामानाधिकरण्यरूपपक्षधर्मत्वोपपत्तौ वपि व्यापकत्वरूप ५१

पक्षधर्मतायाः तेन विनानुपपत्त्या पक्षधर्मताबलादेव साध्ये पक्षतावच्छेदकव्यापकत्वस्यानुमितौ भानावश्यकत्वात् लाघ
वोपनीतमहानसीयवह्न्यादेरनुमितौ भानेऽपि वह्नित्वादिनैव भानोपगमात् तद्धर्मावच्छिन्नाभाववती तद्धर्मावच्छिन्नप्रकाशात्वल
क्षणाप्रमात्वावच्छिन्नभेदस्य लक्ष्यतावच्छेदके निवेशानन्तादृशानुमितेर्लक्ष्यत्वे वातिव्याप्तिभावेन तद्वारणे लक्षणे प्रमात्वनिवे
शस्यानावश्यकत्वात् न चोक्तप्रमात्वस्य लक्ष्यतानियामकत्वे जलपर्वतो वह्निमान् पर्वतो जलवह्निमानित्याद्यनुमितौ अव
च्छिन्नप्रकारताघटितभ्रमत्वस्य सत्वेन लक्ष्यायां विशिष्टपक्षतायां प्रसिद्ध्या लक्षणाव्याप्तिरिति वाच्यं तद्भाववन्निष्ठवि
शेष्यतानिरूपिततन्निष्ठनिरवच्छिन्नप्रकारताकत्वरूपभ्रमत्वावच्छिन्नभेदस्यापि लक्ष्यतावच्छेदककोटौ निवेशेनोक्ता
नुमितेर्लक्ष्यतावारणात् लाघवोपनीतवह्न्यादिगोचरानुमितौ वह्न्यादिनिष्ठप्रकारतायाः निरवच्छिन्नत्वविरहेण तदभाव
त्वप्रकारकत्वसत्वेऽपि निरवच्छिन्नप्रकारताघटितभ्रमभेदस्य सत्तया तादृशानुमितेर्लक्ष्यताभंगात् इति अन्ये तु यत्किंचि
द्विधेयतावच्छेदकरूपावच्छिन्नवत्त्वस्य विशेष्यकत्वमेव प्रमात्वमिह लक्ष्यतावच्छेदके विवक्षितं लाघवाज्ञानादिनानुमितौ

५८ महानसीयत्वमानेपि विधेयतावच्छेदकत्वं वह्नित्वस्यैवेति तदवच्छिन्नवह्निशोष्यकत्वात् लक्ष्यत्वमेवेति तत्रातिव्याप्तिसं
58 भवः प्रागभावादिपक्षतावच्छेदके तु अवच्छिन्नसमवायत्वस्यैव संसर्गत्वेन विधेयतावच्छेदकावच्छिन्नांशे विप्रमात्वविरहा
त् अत्र लक्ष्यत्वे न तत्रैव चाऽमज्ञानपदस्य प्रमापरत्वव्याहृतिः न चाग्निमलिंगोपहितेत्यादिग्रंथासंगतिः वह्नित्वस्यैव विधेय
तावच्छेदकत्वादिति वाच्यं। एतद्ग्रंथस्य भ्रमान्यवृत्तिविषयतावत्त्वरूपप्रमात्वांशेऽविवक्षापरत्वात् न तर्हि लाघवज्ञानादिनानु
मिते संग्रहस्यादिति चेदिष्टत्वात् पूर्वतदलक्ष्यत्वेन तत्रैवातिव्याप्तिलाभेनपदि चेति ग्रंथासंगतेः एवं महानसीयत्वादिविष
यतायाः लाघवज्ञानप्रयोज्यत्वेपि परामर्शप्रयोज्यत्वं शुद्धवह्नित्वावच्छिन्नविषयताया एव परामर्शप्रयोज्यत्वमिति तस्याः भ्र
मान्यवृत्तितया तद्धर्मादाय लाघवज्ञानादिनानुमितेऽपि उत्तरविषयतावच्छेदकत्वे न लक्ष्यत्वमेवेति तत्रापि पूर्वोक्तदोषा
वसरः इत्याहुः चाऽमपदव्यावृत्तिं दर्शयति प्रथमतानेति तत्परत्वे प्रमापरत्वे तत्रैवेति ग्रंथव्याप्यपृथिवीत्ववान् गंधप्रागभा रा म
वच्छिन्नो घटः इति परामर्शस्य प्रमात्वात् प्रथमज्ञानस्य प्रमापरत्वे न निर्वाहः घटंभवइसाधापःयावद्रूमभिन्नत्वमिति तद्वति ५८

तत्प्रकारत्वरूपप्रमात्वस्याव्यावर्तकत्वेन लक्षणे निवेशानर्हत्वादित्यर्थः न चैवं पर्वतो वह्निमान् ह्रदश्च वह्निमानिति समूहा
लंबनात्मकमितेः लक्ष्यतया तत्र लक्षणाभावादव्याप्तिः भ्रमान्यवृत्तिविषयतावत्त्वस्य तदर्थत्वेपि जलमयपर्वतो वह्निमानि
त्यादौ लक्ष्यतावच्छेदकीभूतपरामर्शजन्यतावच्छेदकभ्रमान्यवृत्तिविषयतावत्त्वशून्यतया लक्षणावह्नित्वावच्छिन्नप्रकार
ता निरूपितस्वरूपपर्वतत्वावच्छिन्नविशेष्यतारूपभ्रमान्यवृत्तिविषयतावत्त्वघटितलक्षणस्यातिव्याप्तेर्दुर्वारत्वादिति वाच्यं ल
क्षणेपि परामर्शजन्यतावच्छेदकस्य विषयताया निवेशनीयत्वादिति भावः अत्र वदंति लक्ष्यतावच्छेदके लक्षणे च परा
मर्शपदसमानविशेष्यतावच्छेदककव्याप्यवत्तानिर्णयपरं किं वा पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यवत्तानिर्णयत्वेन त
त्परं वा आद्ये जलमयपर्वतो वह्निमानित्यादौ लक्ष्यतावच्छेदकानाक्रांतत्वेन लक्षणासत्वेन चातिव्याप्त्यभावेपि लक्षणलक्ष्य
तावच्छेदकयोरैक्येन लक्षणासंगतिः परामर्शजन्यतावच्छेदकस्य लक्षणे विषयताया निवेशो विशेषवैयर्थ्येन लक्षणल
क्ष्यतावच्छेदकभेद एव पर्यवसानात् लक्षणलक्ष्यतावच्छेदकयोः विभिन्नरूपेण परामर्शनिवेशान्न दोष इति चेत् लक्ष्यतावच्छे

दकेत्वसमानविषयकपरामर्शस्यलक्षणेचपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यवत्तानिर्णयस्यनिवेशेजलमयपर्व
तोवह्निमानित्यादौअतिव्याप्तिर्दर्शितइवविपरीतनिवेशेतुतत्रैवव्याप्तिपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यवत्तानि
र्णयजन्यतावच्छेदकभ्रमान्यवृत्तिविषयतावत्त्वेनतादृशानुमितेर्लक्ष्यतयातत्रस्वसमानविशेष्यकपरामर्शजन्यतावच्छे
दकभ्रमनिवृत्तिविषयतावत्त्वघटितलक्षणाव्याप्तत्वात्द्वितीयेजलमयपर्वतोवह्निमानित्यत्रलक्ष्यतावच्छेदकाक्रान्तत्वेन
लक्षणत्वेनचाव्याप्यभावेपिपूर्वविदेयलक्षणलक्ष्यतावच्छेदकभेदतादवस्थ्यंविभिन्नरूपेणनिवेशेद्वेधापिदोषोदर्शितए
वेति॥इतिध्येयं॥अव्याप्यइतिवह्निव्याप्यधूलीपटलवान्पर्वतइत्यादिपरामर्शेधूमादेःपर्वतवृत्तित्वानुपस्थितिदशायांपा
पर्वतोवह्निमानित्यनुमितिःतत्राव्याप्तिरित्यर्थः॥तेनवह्निव्याप्यधूलीपटलवानित्यादौव्याप्तिविशिष्टसमानाधिकरणतयाधू
मादिनिष्ठपक्षधर्मतातस्याएवधूलीपटलेभ्रमइतिकथंतादृशपरामर्शजन्यानुमितौअव्याप्तिरितिसमाहितं॥अपक्षधर्मइति राम०
वह्निव्याप्यमहानसत्ववान्पर्वतइत्यादिपरामर्शोत्तेत्यर्थः॥ननुदर्शितानुमितिद्वयस्यापिविशिष्टलिङ्गोपहितपक्षविषयक ५९

त्वेनयथार्थव्याप्तिपक्षधर्मत्वांशेऽभ्रमरूपतायाल्लक्ष्यते वनेनित्वाव्याप्तिरित्याशंकापरिहारमवतारयतिननुनस्यादितिप्रमा
णाभावादित्तोतियद्यपिभ्रमलिंगतानुमितौव्यभिचारवारणायअवहितोत्तरत्वस्यकार्यतावच्छेदकत्वेनस्यततद्व्यक्तिवि
श्रांततया अनुगतकारणतायाएवानुपपत्तिः अतः लिंगोपधानाभ्युपगमेलिंगविषयतायास्तस्यपरामर्शजन्यतावच्छेद
कत्वेतेनिवेशेनव्यभिचारवारणंसंकरमितिइदमेवलिंगोपधानेप्रमाणंसंभवतिएवंलिंगोपधानाभ्युपगमेव्यभिचारविरुद्धा
दीनांहेत्वाभासत्वानुपपत्तिः तेषामनुमितिविरोधित्वाभावात् नचकारणविरोधित्वेनतथात्वंबाधसत्प्रतिपक्षयोरसंग्र
हापत्तेः नचान्यतमविरोधित्वेनसर्वसंग्रहः एवमपिएकज्ञानीयविरोधिनामेवपंचत्वौचित्येनविभिन्नज्ञानविरोधितामादा
यचैत्रमैत्रान्यतरस्यपंचपुत्रादिवत्दोषाणांपंचत्वानुपपत्तेः नचएकत्वपेक्षयापंचत्वदोषेषुहेतुत्वंबाधस्यापिस्वविषय
कपरामर्शतज्जन्यानुमितिअन्यतरविरोधद्वारकतामपेक्ष्यानुमितिमात्रविरोधद्वारकतायाएवऔचित्येनानुमितिविरोध
द्वारेणदोषपदत्वस्यलिंगोपधानमन्तरेणानुपपत्तेः तस्मात्कथंलिंगोपधानमप्रमाणमितिसत्यंप्रमाणाभावादित्यस्यवा

६० धकसद्भावइत्यर्थः अथाहि वह्निव्याप्यधूमवान्पर्वतइति अवच्छिन्नसंसर्गकपरामर्शस्थले पर्वतो वह्निमानिति अवच्छि
न्नसंसर्गकानुमितिसर्वानुभवसिद्धा वह्निसंशयमात्रनिवृत्तिश्च तथा यदि वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति लिंगो
60 पधानमाश्रीयते तदा तादृशानुमितेः नीलपर्वतो वह्निमानिति ज्ञानस्येव पर्वतत्वावच्छिन्नसंसर्गकवह्निप्रकारकत्वासंभवा
त्संशयमात्रनिवर्तकतानुपपत्तिः नहि नीलपर्वतो वह्निमानिति ज्ञानस्य वह्निसंशयमात्रनिवर्तकत्वं कश्चिदभ्युपैति न
वा आनुभविकं। ननु व्याप्तिविशिष्टपक्षधर्मताविषयकत्वे नैव ज्ञानलक्षणस्य घटकतया ईश्वरज्ञानस्यापि तथात्वेन तज्ज
न्यतामादायैव उक्तानुमित्योः अव्याप्तिः सुपरिहरैव न च आह ईश्वरइतीति परामर्शनिष्ठजनकतात्वेन निवेशे ईश्वरीय—प
रामर्शनिष्ठउपादानप्रत्यक्षत्वावच्छिन्नजनकतामादाय प्रत्यक्षातिमात्रे अतिव्याप्त्या तत्त्वापरामर्शत्वावच्छिन्नजनकतात्वे
नैव तन्निवेशावश्यकत्वेनेश्वरजन्यतामादायाव्याप्तिपरिहरसंभव इति भावः तादृशप्रमेति। अव्याप्यपक्षधर्मस्थली एम०
यप्रमेत्यर्थः ह्रदो वह्निमानित्यनुमितेस्तु भ्रमत्वेनालक्ष्यतया तद्व्याप्तिर किंचित्करत्वमित्याशयः ननु व्याप्तिविशिष्टेया ६०

पक्षधर्मताज्ञस्याः ज्ञानान्वयविवक्षायां वह्निव्याप्यधूलीपटलवान् वह्निव्याप्यमहानसत्वात्पर्वत इत्यादिस्थलीयानुमि
तौ धूमादिनिष्ठपक्षधर्मताया एवभानोपगमेपि ज्ञानस्य भ्रमत्वनिर्वाहेण न तज्जन्यतानुमितावव्याप्ताव्यापकता इत्य
त आह तज्ज्ञानं चेत इति। व्याप्तिविशिष्टविषयकत्वे सति पक्षधर्मताविषयकं यज्ज्ञानं तज्जन्यत्वेत्यर्थः एवंच भ्रमाप्ये भ्रव्या
प्यतावगाहिज्ञानजन्यानुमितौ व्याप्यादिभ्रमेपि परामर्शस्य व्याप्त्यादिविशिष्टविषयकत्वाभावेन तज्जन्यानुमितावव्या
प्तिः सुदृढ एवेति भावः मिश्रात्मककर्मधारयाश्रयेणाभ्रमस्थाव्याप्तिदोषात् द्वंद्वाश्रयणमेवोचितं तत्र द्वंद्वाते श्रूयमाणाभा
वशब्दः प्रत्येकमपि संबंध्यत इति न्यायेन द्वंद्वोत्तरभावप्रत्ययेन प्रकृत्यर्थतावच्छेदकद्वयलाभात् तदवगाहिज्ञानजन्य
त्वं लक्षणार्थः तच्च भ्रमस्थलेपि संभवति एकधर्मिविषयतानिरूपितत्वयोर्भयावगाहितायाः स्वातंत्र्येणाविवक्षणीय
त्वेनैव समूहालंबनस्य वारणासंभवात् न द्वंद्वाश्रयणे द्वंद्वस्य पदार्थभेदनिमित्तकत्वेन विभिन्नपदार्थीवव्याप्यविशि
ष्टत्वपक्षधर्मत्वोभयावगाहित्वानस्यैवलाभ इति एकधर्मिनिष्ठोभयावगाहित्वानस्यैवासंग्रह इति तादृशोभयावगाहितायां

६१ 61 एकधर्म्मिविशेषतानिरूपितत्वविवक्षणे वा स्वार्थबाध एवेति वाच्यं पदार्थपदार्थतावच्छेदकान्यतरभेदस्यैव द्वंद्वनिय
कत्वपा एकस्मिन्नति धर्म्मिणि पदार्थतावच्छेदकभेदसंभवेन घटत्वपटत्वमित्यादौ विभिन्नपदार्थायस्यैव व्याप्तिविशि
ष्टपक्षधर्मत्वमित्यादौ विभिन्नपदार्थतावच्छेदकात्मकउभयस्यापि एकधर्म्मिनिष्ठस्य द्वंद्वोत्तरप्रत्ययेन भावप्रत्ययेन प्र
तिपादनाविरोधादिति वदंति तन्मतदूषयितुमुन्मस्यति दीधितौ व्याप्तिविशिष्टस्येति ननु परस्परानात्मकयोरेव व्याप्ति
विशिष्टपक्षधर्मयोः द्वंद्वार्थत्वात् वह्निव्याप्यविशिष्टपर्वतवृत्तिधूमस्य द्वंद्वार्थताभावात् तदीयोभयावगाहिनः परा म
र्शस्य कथं द्वंद्वार्थीयोभयावगाहित्वं अतस्त्वाह पदार्थयोरितिभेदेनापीति अपिशब्देन पदार्थभेदसमुच्चयः तथा च वह्निव्या
प्तिविशिष्टपर्वतवृत्तिधूमस्य धर्मिणा अभिन्नत्वेपि पदार्थतावच्छेदकयोः भिन्नतात् तादृशधूमोपि द्वंद्वार्थ एवेति तदीयोभयाव
गाहिना परामर्शस्य नासंग्रह इति भावः ननु नीलोत्पलमित्यादावपि द्वंद्वस्यैव प्रवृत्तौ कर्मधारयस्य विषयालाभः पदार्था गम०
भेदस्थले कर्मधारयस्य द्वंद्वापवादकत्वे व्याप्तिविशिष्टेत्यादौ द्वंद्वानुपपत्तिरेव एवं नीलोत्पलमित्यादावपि द्वंद्वैक्यवा ६१

कार्यतो बोधोदृष्टकर्मधारयानुशासने वैयर्थ्यं च फलभेदाभावात् अत आह पदार्थद्वयेति। अभेदबोधकादिति पदार्थद्वया
भेदबोधतात्पर्यकात्पदार्थद्वयाभेदबोधजनकाच्चेत्यर्थः भेदाभेदोदासीनेति भेदाभेदाविषयकपदार्थद्वयबोधजनकत्वे
न भेदाभेदसाधारणसंसर्गतात्पर्यसामान्यशून्यत्वेन चेत्यर्थः तथा च द्वंद्वे प्रवृत्तौ तादृशसंसर्गतात्पर्यसामान्यशून्यत्वस्य
निमित्ततया नीलोत्पलमित्यादौ अभेदसंसर्गतात्पर्ये द्वंद्वनिमित्ताभावात् द्वंद्वाप्रवृत्त्या कर्मधारयस्यैव प्रवृत्तिः एवं तत्रैव
भेदाभेदाविषयकपदार्थद्वयबोधस्य सामग्र्यभावेनासंभवात् अभेदविषयकबोधस्य च कर्मधारयानुशासने संभवा
त् तादृशप्रयोगस्याप्रमाणत्वमेव स्यादिति तत्राभेदबोधनिर्वाहाय दृष्टकर्मधारयानुशासनमावश्यकमेवेति भावः व्या
ख्यायां पदार्थतावच्छेदकेतीति पदार्थभेदाभावेऽपि पदार्थतावच्छेदकव्याप्तिविशिष्टत्वपक्षधर्मत्वादिभेदादेव व्याप्तिविशिष्ट
पक्षधर्मत्वपदे द्वंद्व इति भावः ननु पदार्थस्य द्वंद्वनियामकत्वमभ्युपगच्छतां प्राचां मते किं पदार्थतावच्छिन्नभेदः किं वा पदार्था
वच्छेदकावच्छिन्नभेदः तत्राद्ये अथाइत्यादौ द्वंद्वानापत्तिः तदपवादकएकशेषानापत्तिश्च द्वितीये पदार्थतावच्छेदकावच्छि

६२ 62 न्नभेदः अपरपदार्थतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन वा प्रथमे द्रव्यघटाविसादि द्वंद्वापत्तिः द्रव्यत्वसामा
नाधिकरण्येन घटत्वावच्छिन्नभेदसत्वात् द्वितीये मूर्त्तमूर्त्ते इत्यादौ द्वंद्वानुपपत्तिः मूर्त्तत्वावच्छिन्नभेदस्य मूर्त्तत्वावच्छेदेन
मूर्त्तत्वावच्छिन्नभेदस्य मूर्त्तत्वावच्छिन्नभेदेन सत्वात् एवं घटाविसदौ द्वंद्वाप्रसक्तौ स[illegible]षोषानापत्तिः एकपदार्थतावच्छेद
कावच्छिन्नभेदस्यापरपदार्थतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन वाभावादिति सत्यं पदार्थभेदस्य द्वंद्वनियामक
त्वमते एकपदार्थतावच्छेदकाश्रयेऽपरपदार्थतावच्छेदकाश्रयनिष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्यैव नियाम
कत्वोपगमात् घटाविसादौ एकधर्मस्यैव पदद्वयप्रवृत्तिनिमित्तत्वेपि तदाश्रययोः तद्व्यक्तित्वावच्छिन्नभेदसत्वेन तत द्वंद्व
प्रवृत्तेः निष्प्रत्यूहत्वात् अक्षाइत्यादौ तु स्फुटैव द्वंद्वप्रसक्तिः अत एव परस्पराणात्मकनीलघटादिव्यक्तिद्वयविवक्षायामेव
नीलघटादिपदे द्वंद्वसंभवः न तु परस्पराणात्मकएकव्यक्तिविवक्षायामिति अग्निविशिष्टात्मकपक्षधर्मधूमादिविवक्षायामे रा.म.
तन्मते द्वंद्वाप्रवृत्तिरिति पदार्थभेदस्य द्वंद्वनियामकत्वमनाहत्य पदार्थतावच्छेदकभेदस्यैव तन्नियामकत्वमाश्रित्य पदार्थे ६२

कारणत्वेपि द्वंद्वसमर्थनं। पदार्थभेदस्य नियामकत्वे तत्तस्य न धर्मी विशेषणत्वेन तत्त्वं किंतु पदार्थतावच्छेदकविशेषणतयै
व तथाच अपरपदार्थसमानाधिकरणस्वप्रवृत्तिनिमित्तकत्वस्य पदद्वयनिष्ठस्य द्वंद्वप्रयोजकतालाभात् व्याप्तिविशिष्टभि
न्नपक्षधर्म धूमादिविषयांतादृशधूमात्मकपक्षधर्मपदार्थस्य व्याप्तिविशिष्टभेदाभावेपि पक्षधर्मपदार्थतावच्छेदकीभूतपक्ष
धर्मतायाः पत्किंचिद्धर्म्यंतर्भावेन व्याप्तिविशिष्टभेदसमानाधिकरणतया द्वंद्वनिर्वाह इति पदार्थतावच्छेदकभेदस्य द्वंद्वनिया
मकत्वाश्रयणे न घटादिसादावपि पदार्थतावच्छेदकस्य घटत्वादेः व्यक्तिद्वयभेदसमानाधिकरणत्वेन द्वंद्वप्रवृत्तेरप्रसूह
त्वात् तत्र तु पदार्थतावच्छेदकभेदस्य तत्र प्रसक्तेरप्यभावे न द्वंद्वसंभावनापि एवानुपपत्तेरिति वाच्यं एवं सति एकव्यक्तिता
त्पर्यकघटपदद्वयस्यापि द्वंद्वापत्तेः उभयोरपि पदयोः घटांतरांतर्भावेन परांतरांतर्भूततद्घटभेदसमानाधिकरणघटत्वात्मक
स्वप्रवृत्तिनिमित्तकत्वात् तस्माद्धर्मिविशेषणत्वेनैव पदार्थभेदस्य तन्मते द्वंद्वनियामकत्वं आस्थेयमिति एकधर्मितात्पर्यके द्वं
द्वाप्रवृत्तिरेवेति तन्मतसारगरवोचितइसाशयः व्याख्यायां न चेवमिति एवं पदार्थतावच्छेदकभेदस्य नियामकत्वे इत्यर्थः द्वंद्वा

६३
63

पवादकत्वेति निमित्तेकोहि अपवाद्यापवादकभावः तत्पदार्थतावच्छेदकभिन्नस्वपदार्थतावच्छेदकत्वस्य पदगतस्य द्वंद्व निमित्तत्वे
घटाविसादौ घटादिपदे तादृशानिमित्ताभावेन द्वंद्वाप्रसक्तौ निमित्तवदिति कार्यनिवर्त्तकत्वलक्षणाद्वंद्वापवादकत्वानुपपत्तिरि
त्यर्थः एकविषयत्वेति एकनिमित्तकत्वाभावादित्यर्थः पदार्थतावच्छेदकभेदस्य पदिपदार्थतावच्छेदकभेदत्वेन नियामकत्वस्या
दपि तथा उक्तदोषः किंतु परार्थपदार्थतावच्छेदकसाधारणापदजन्यप्रतीतिविषयभेदत्वेन तत्त्वं नीलघटयोरित्यत्र घटाविस्य
त्र चाक्षममतमेवइति न प्रकृतानुपपत्तिः न वा एकशेषस्य द्वंद्वापदकत्वविरोधः इत्याहपदजन्येति भेदापेक्षइति विशेष्यतायाः प्रका
रतासंसर्गतास्य विषयतारूपत्वेन तदवच्छिन्नभेदापेक्षया पदजन्यप्रतीतिविषयतावच्छिन्नभेदस्य नियामकत्वे लाघवादित्यर्थः
उक्तानुगतनिमित्तं विवक्षितेष्वलक्षे प्रदर्शयति एवं चेति न च एकघटतात्पर्यकघटपदद्वयस्य एतन्मतेपि द्वंद्वापत्तिरनिवार्येव
तादृशविषययोः घटपदत्वयोर्भेदसत्त्वादिति वाच्यं सजातीयविषयभेदस्यैव द्वंद्वनियामकतया प्रकारविषययोर्भेदस्याकिंचित्कर
त्वात् तत्प्रतिपाद्यपत्तिं चित्प्रतिपादकत्वस्य फलतः पदार्थभेदद्वारार्थतात्त्वन्न्येवमपिमेयवाच्ययोरभेदइत्यादौ वाप्रतिपाद्ये

ग॰म॰
६३

कस्यचिदपि मेयपदप्रतिपाद्यत्वावच्छिन्नभेदासत्त्वात् द्वंद्वानुपपत्तिः नच पदजन्यप्रतीतिप्रकारभेदतादृशविशेष्यभेदान्यतरत्वे
नैव द्वंद्वप्रयोजकत्वात् मेयपवाच्ययोरभेद इत्यादावपि मेयत्ववाच्यत्वभेदमादाय द्वंद्वोपपद्यत एवेति वाच्यं मेयादिपदजन्यप्रती
तिविशेषणत्वस्य केवला-न्वयितया तादृशविशेष्यतावच्छिन्नप्रतियोगिकविशेष्यकभेदाप्रसिद्ध्या तद्घटितान्यतरत्वस्यान्न दुर्लभ
त्वादित्यत आह अक्षादित्यादीति यथा अक्षतेपीतीति प्रकारभेदत्वेन द्वंद्वनियामकत्वेपीत्यर्थः नानुपपत्तीति न स्वरूपैकशेषस्य
द्वंद्वापवादकतानुपपत्तिरित्यर्थः नच द्वंद्ववाधार्थं सरूप एकशेषानुशासनं फलं अनेकमन्यपदार्थ इति सूत्रात् अनुवृत्त्य
स्यानेकत्वस्यानुपूर्विभेदलक्षणस्य निमित्तत्वस्वीकारे गोव घटाविरोधो द्वंद्ववृत्तिवारणासंभवेन तदर्थमेकशेषानुशास
नस्यायुक्तत्वादिति वाच्यं द्वंद्ववाधनस्याफलत्वेपि वृत्त्यान्वयोपपादनस्यैव एकशेषानुशासनपरत्वात् तन्नस्यैकशेषानुशासने
घटत्वादित्यादौ वृत्त्यान्वयनिर्वाहः एकेन घटपदेन अनेकार्थोपस्थापनासंभवेनानेकघटपदस्य श्रवणाप्रसंगात् सकृदुच्च
रित इति न्यायात् नच सकृदुच्चरितन्यायस्य अनेकवृत्तिप्रयुक्तानेकार्थोपस्थापकत्वाभाव एव विषय इति एकवृत्त्यैकघट

६४
64

पदेनानेकार्थोपस्थापनमहद्धत्वमेवेति न बहुत्वानपविरोध इति वाच्यं एवमपि अक्षाहरायादित्यादौ अनेकार्थोपस्थापनस्य
अनेकपदं विनाऽसंभवेन एकशेषानुशासने बहुत्वान्वयोपयोगितया अनेकपदस्यावश्यदुर्वारत्वात्त्र च एकशेषानुशा
सनेपि कथमेकपदस्य अनेकार्थोपस्थापकत्वं स्यात् अतो वपदानामनेकार्थोपस्थापकत्वानागीकारेणापदांतरलोपसहका
रेण अनेकार्थोपस्थापकत्वस्यापत्तिद्धत्वात् यदि सकृदुच्चरितं मायस्य एकजातीयवृत्तिविषयार्थबोधकत्वप्रदर्शनमुद्दे
न पुनरावृत्तिद्वयेनार्थबोधकत्वाभावतात्पर्यकत्वं एवं च घटाविसादाविव अक्षाहरायइत्यादावपि एकेनैवानेकार्थोपस्थापनमि
ति न बहुत्वान्वयनिर्वाहाय एकशेषशास्त्रारंभो युक्त इति विभाव्यते तदा अत्राहरइत्यादौ एकस्मादेव पदात् अनेकार्थानुभव
स्यप्रामाणिकत्वेस्वरूपतामेकशेषशास्त्रमिति अत्र केचित् सकृदुच्चरितइति नियमाश्रयेणापदारकशेषशास्त्रारंभो न तदाक्षोप्ये
कशेषः॥ कृतद्वंद्वानामेव न तु तस्माद्वंद्वाधवादकतानतथासति विभक्तिकानामेव द्वंद्वसंभवात् सविभक्तिकानामेव एकशेषस्यवा
च्यतया सूपमाणपदोत्तरं सुविभक्तेरवस्यानापत्तेः लुप्तपदानां सूपमाणावहुवचनाप्रकृतितयातदर्थान्वितबहुत्वान्वय

नाम०
६४

बोधकतायाः प्रत्ययेऽनुपपन्ने च समासोत्तरमेकशेषोपगमे च समासनामस्य प्रातिपदिकतयाऽऽश्रूयमाणपदोत्तरविभक्तेः
लोपसंभवेन समासान्तर्गतसकलपदानां समासोत्तरविभक्तिप्रकृतितया च सर्वसामञ्जस्यादिति। अत्र वैयाकरणाः प्राति
पदिकानामेव एकशेषः न तु कृतद्वन्द्वानामकृतद्वन्द्वानामपि सविभक्तिकानां वा कृतद्वन्द्वानामेकशेषोपगमे पंधानदइत्यादौ क्रू
रश्रूरिति समासान्तस्य करेकराधिराशिरासीत्यादौ प्रासंगोकवद्भावस्य चतुर्वीरत्वापत्तेः अकृतद्वन्द्वानां सविभक्तिकाना
मेकशेषोपगमे शिष्यमाणपदाद्विभक्तेर्लोपप्रसंगाच्च न च प्रातिपदिकैकशेषे समासाभावेन लुप्तपदानां बहुवचनाप्रकृ
तित्वेन तदर्थान्तर्भावेन बहुत्वान्वयबोधानुपपत्तिरेवेति वाच्यं प्रकृतित्वस्य तात्पर्यविशेषविषयत्वगर्भतया समासस्थल
इवासमासस्थलेऽपि लुप्तपदानां बहुवचनप्रकृतित्वस्यासत्ततया बहुत्वान्वयसौलभ्यात् न चैवमेकशेषस्य द्वन्द्वापवादकता
नुपपत्तिः सति निमित्ते कार्यनिवर्तकस्यैवापवादकत्वस्य ताद्वार्थ्यतया अनेकसुबन्तत्वादिरूपनिमित्तस्यैव प्रातिपदिकैकशे
षसंभवादिति वाच्यं वार्यादिरूपविषयविशेषस्यैव निमित्तस्येह अपवादकताघटकत्वेन यावन्निमित्ताभावेऽपि अपवा

६५ 65

दकत्वाक्षतेः न च एकशेषस्योक्तरीत्या निमित्तापेक्षत्वे द्वंद्वापेक्षयांतरंगत्वाभावेन प्राथमिकप्रवृत्त्यनुपपत्तिरिति परत्वात् द्वं
द्वप्रवृत्तावनंतरमेव एकशेषप्रवृत्तिरिति अनिवार्य एव तन्वापि दोष इति वाच्यं विषयात्मकनिमित्तैकदेशमात्रसापेक्षत्वेपितृ
वेत्वादिलक्षणानेकनिमित्तसापेक्षत्वाभावेन द्वंद्वापेक्षया एकशेषेंतरंगतायाः दुर्वारत्वात् तदानीमुक्तत्वाभावेन द्वंद्वप्रवृत्तेरे
वासंभवेनार्थादेव प्रातिपदिकेष्वेकशेषप्रवृत्तिपर्यवसानाच्च सति त्वेकशेषे अनेकपदाभावेनैव द्वंद्वाप्रवृत्त्या एकशेषस्य
द्वंद्वापवादकत्वप्रवादोपपत्तेः नहि यावन्निमित्तसमवधानकालीनप्रवृत्तिकस्यैवापवादकत्वनियमो मानाभावात् न वा न्यूना
धिकनिमित्तयोः कार्ययोरेककालप्रतीक्षया प्रवृत्तिः अंतरंगबहिरंगभावमात्रस्यैवोच्छेदप्रसंगात् तस्मादंतरंगत्वात्प्रातिप
दिकावस्थायामेवैकशेषः ततो निमित्ताभावान्न द्वंद्वप्रवृत्तिः अनिमित्त एकशेष इत्यस्यापि द्वंद्वीययावन्निमित्तानपेक्ष इत्येवा
र्थः अन्यथा निमित्तसामान्यस्यानपेक्षणे पयः पयो जलम् इतीत्यादावेकशेषापत्तेः ब्रह्मणोपि दुर्वारत्वात् एतन्मते एकशेषस्यप रा०म०
दविधित्वाभावेन सामर्थ्याभावेन वाऽत्रासंभवादत एव प्रातिपदिकमात्रस्यैकशेषानंगीकारेऽपि वरखदिरयोः ऊर्ध्वतिर्य ६५

क्तादिभिन्नरूपेणाछिंदिलाभेदविवक्षायांधवखदिरावितिद्वंद्वप्रवृत्तिवत्तथवव्यक्तिरूपस्यैवतादृशाछिदाभेदविवक्षायांए
कशेषाप्रवृत्तेरपिसिद्धांतसिद्धत्वात्तत्वन्मतेतदनुपपत्तिःएकशेषस्यपदविधित्वाभावेनसामर्थ्यविषयातुल्यवदेकक्रिया
न्वयित्वस्यानपेक्षणीयत्वात्तादृशस्थलेएकशेषस्यदुर्वारत्वादितिनिरस्तं।चार्थविषयेवतुल्यवदेकक्रियान्वयित्वस्यावे
क्षणीयत्वनयापदविधित्वाभावस्याकिंचित्करत्वादिति।यत्तुकेचिदाहुःअस्तुहन्तद्वंद्वानामेवपूर्वोक्तबाधकबलादेकशेषःत
थापिसविभक्तिकानामेवनत्वविभक्तिकानांसत्यासतिउक्तदशासामर्थ्यस्यानवेक्षणीयत्वेनउक्तस्थलेएकशेषप्रवृत्तेर्दुर्वा
रत्वात्सविभक्तिकैकशेषेषुएकशेषस्यपदविधित्वात्वैरूप्येणक्रियान्वयविवक्षायांधवौछिधिखदिरौछिंधित्यादिकोने
कशेषःनचसविभक्तिकएकशेषेशिष्यमाणपदेलोपप्रसंगःप्रत्ययान्तत्वेनार्थवत्त्वाभावात्असमासत्वेनहलन्ताद्वितेतिसू
त्राद्वाप्रातिपदिकसंज्ञायाभावादितिवाच्यं।तद्रूपस्तेअत्रवत्त्वात्ह्रस्वोनपुंसकइतिसूत्राद्वाप्रातिपदिकग्रहणमनु
वृत्त्यसरूपाणामेकंविभक्तौतशिष्यतेतच्चप्रातिपदिकंभवतीत्यर्थाश्रयेणतुसुपोधातुःप्रातिपदिकयोरित्यनेनविभक्तिलो

९९ 66

पोपत्तेः नचैवमपि राजानो लिहाविस्यादौ नलोपढत्वापत्तिः अंतर्वर्त्तिनिविभक्तिमाश्रित्यपदसंज्ञासंभवात्पदसंज्ञायाः
प्रत्ययपर्यायकार्यतया नहि कार्यनिमित्ततयेति — येन तन्निमित्तत्वाभावेन पदसंज्ञायां न तु मतेति निषेधाप्रवृत्तेरिति वाच्यं
अ सर्वनामस्थाने इति निषेधस्य स्वादिनिमित्तकायाः पदसंज्ञायाः च प्रत्ययलक्षणेन प्राप्तिं दृष्ट्वा निमित्तत्वेन एकदेशविकृतन्याया
त्प्रत्ययविनिर्मुक्तभागस्य पदसंज्ञा तादृशाद्विविधसंज्ञां प्रत्यपि बाधकत्वोपगमेन राजानो लिहाविसादौ अंतर्वर्त्तिविभक्ति
प्रयुक्त एकदेशविकृतन्यायलब्धपदसंज्ञाया अपि निषेधेन नलोपढत्वादिप्रसक्तेः एवं च द्वंद्वात्वपादकत्वमेकशेषस्यानु
पमेव निर्वहति यावत् द्वंद्वनिमित्त एत्व एव एकशेषस्वीकारेणापवादविषये व एकशेषेण द्वंद्वबाधा न तु निमित्तेकदे शा
श्रयेणांतरंगतया द्वंद्वसामग्रीविघ्नद्वारेण तद्बाधकत्वं तादृशबाधकत्वस्य अपवादकत्वप्रयोजकार्थत्वाभावेनापवादकत्वप्र
वादात् प्रसक्तेः परंनित्यांतरंगापवादानामिति अंतरंगापवादयोः पृथगुत्कीर्तनविरोधाच्च तस्मात् अत्र द्वंद्वानां सविभक्तिका राम०
मेकशेषइत्येव युक्तमिति तत्त्वम् अस्य पंपदविधित्वाभावे विचार्य विधयैव सामर्थ्यापेक्षाप्रकारं तस्य दर्शितत्वेन पुवंततत्वल ९९

६ ष्ण निमित्तां तदा स एकशेषस्वीकारस्याभिनिवेशमात्रत्वात्तस्यापि गौरवे प्रमाणाडीभेदमात्रत्वेन तस्याक्षोपयगमेपि एतकाश्च
67 लंतीत्यादौ एतिकापदे प्रत्ययस्यादित्यनेन इत्वानुपपत्तिः तथा हि एतत्कस्तु एतत्तु एतक स्तु इत्यत्र एकशेषनान्तर्वर्ति नि
विभक्तिमाश्रित्य समुदायस्य त्वेलुधिपत्वात् अतो लुगनंतरं महाविभक्तिमाश्रित्य समुदायत्वमिति तादृशात्वाम्प्रयाणां तदमेवा
पः प्रवृत्तिर्वाच्येति आपः सुपरत्वान्तत्वाप्राप्तिः अत एव बहुतेत्वैनेव एकशेष इति प्रसक्तं स्वतस्सिद्धात्वस्य लोप्यअर्थविषयेख
ट्टिकाइत्यादौ तथा संभवेपि विभक्त्याधीनात्वस्य लोप्यअर्थविषये महाविभक्तिमादायैव आपो निर्वाहितया तत्रांतर्विभक्ति
मादाय आपः सुप्परतया दुर्वारत्वात् तस्मात् प्रातिपदिक एकशेषपक्ष एवानादित्याम्रपि तु मुचितः नत्त तदैव एकशेषपक्षः
सविभक्तिकैकशेषपक्षो वेति वदंती तिहृत तंतत्रांतर विचाराभिनिवेशेन० नत्र

संरंभः क्व वाग्यदीधितिदृढाहंभाववं धच्छिदोदंभाधीन कटुदुईरूटकदमनारंभायमं संभावयत्तं मारो हमुदग्रकुंजरघराक्रंभाद्भहः राम० ६
किंतरोरं भानिर्भरपीवरत्वनपरीरंभायं जृंभां दरः